4. शिक्षायाः विविधान् अंशान् सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।
5. विवाहप्रकारान् सभेदं वर्णयितुं शक्ष्यन्ति।
6. कुटुम्बे समाजे च स्त्रीणां स्थितिं, तासामधिकारान् उत्तरदायित्वानि च कथयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 1.क.1	स्मृतिसाहित्यपरिचयः	04	0	0	04

पाठ्यक्रमस्य विवरणम् (Details of Course)

अन्वितिः १. स्मृतिसाहित्यस्य संक्षिप्तपरिचयः। **श्रेयोऽङ्कः १**

- स्मृतिसाहित्यस्य संकल्पना।
- स्मृतिसाहित्य-धर्मशास्त्रयोर्भेदः।
- स्मृतिसाहित्यस्य कतिपयप्रसिद्धलेखकाः - मनुः, याज्ञवल्क्यः, शुक्राचार्यः, सोमदेवश्च।

अन्वितिः २. मानवजीवनस्य मूलभूततत्त्वरूपो धर्मः **श्रेयोऽङ्कः १**

- **धर्मः**
  - धर्मस्यार्थः।
  - धर्मस्रोतांसि (मनुस्मृतिः२.१, ६, १ ०, १२) (याज्ञवल्क्यस्मृतिः १.७)
  - धर्मस्य दशविधता तस्य संस्करणानि च (मनुस्मृतिः ६.९१-९४)
- **वर्णाश्रमव्यवस्था**
  - सुसंगठितसमाजः।
  - वर्णाश्रमस्य संकल्पना, संरचना, प्रयोजनम्, प्रासङ्गिकत्वं च (मनुस्मृतिः १.८७, १०.४, १.८८, १.८९, ९.३२६, १.९०, १.९१, १०.६५, ९.३३५, ४.२४५, २.१०३, २.१६८)
- **आश्रमव्यवस्था - मानवजीवने साम्यानयनम्।**
  - आश्रमधर्मः (मिताक्षराटीका याज्ञवल्क्यस्मृतिः १.१)
  - स्मृतिसाहित्ये चित्रिताः विविधाः आश्रमाः।
  - विवाहः (मनुस्मृतिः ३.४)
  - पञ्चमहायज्ञाः (३.६९-७६, ८२)
  - गृहस्थाश्रमस्य महत्त्वम् (३.७७-८१, ६.८२-९०)
  - गृहस्थस्य सामाजिकदायित्वम्।

अन्वितिः ३. **श्रेयोऽङ्कः १**

- **शिक्षा।**
  - ज्ञानप्राप्तिः, शिक्षारम्भश्च (मनुस्मृतिः २,) (याज्ञवल्क्यस्मृतिः १.१०-११५)
  - गुरुकुलम् (मनुस्मृतेः द्वितीयस्तृतीयश्च अध्यायौ) (याज्ञवल्क्यस्मृतिः १.१०-११५)
  - वस्त्रधारणम्, आहारः, उत्थानं, शयनम्, आचरणम् इत्यादिविषयका नियमाः।
- **विवाहः।**
  - स्त्रीपुरुषसम्बन्धनियमनार्थं सामाजिकसंस्थारूपेण विवाहः, विवाहप्रकाराश्च (मनुस्मृतिः ३.२७-३७) (याज्ञवल्क्यस्मृतिः १.५८)
  - स्त्री स्वयं पतिं वरणे अधिकारिणी (मनुस्मृतिः ९.९०-९१) (याज्ञवल्क्यस्मृतिः १.८९)
  - कन्यावरयोः योग्यताः (मनुस्मृतिः ३.२-११) (याज्ञवल्क्यस्मृतिः - १.३५, ५२-५५) (नारद. १२.८-११)
  - विवाहविच्छेदः (मनुस्मृतिः ९.७२-७४) (याज्ञवल्क्यस्मृतिः १.७६) (नारद. १२.१६-१९)

अन्वितिः ४. स्त्रीणामधिकाराः। **श्रेयोऽङ्कः १**

- स्त्रीसम्मानम् (मनुस्मृतिः ३.५५-५८, ६२, ९.२६) (याज्ञवल्क्यस्मृतिः - १.८२)
  - स्त्रीसुरक्षा (मनुस्मृतिः ९.३, ९.५-७) (याज्ञवल्क्यस्मृतिः १.७६,८५)
  - दुष्टसन्ततिविषये स्त्रीणां न दोषः (मनुस्मृतिः ९.९,३३,३६,४०)
  - कन्याविक्रयणं न कर्तव्यम् (मनुस्मृतिः ३.५१,५३,५४, ९.८,१००) (याज्ञवल्क्यस्मृतिः १.६४)
- **स्त्रीणां सम्पत्त्यधिकारः।**

- सम्पत्तिस्वामित्वाधिकारः (मनुस्मृतिः ९.१९२-१९५, ९.२१७) (याज्ञवल्क्यस्मृतिः १.७६) (नारद ४.१४)
- स्त्रीणां सम्पत्तेः संरक्षणम् (मनुस्मृतिः ८.२८-२९, ८.३५०)
- उत्तराधिकाराधिकारः (मनुस्मृतिः ९.११८, १३०, १३१) (नारद ४.१३) (याज्ञवल्क्यस्मृतिः २.११५)
- स्त्रीणां सम्पत्तिं कदापि न गृह्णीयात् (मनुस्मृतिः ३.५२, ९.२००)
- स्त्रीसम्पत्तिरूपेण अगणनीयानि वस्तूनि (मनुस्मृतिः ९.९२,१९९)

- **स्त्रीणां प्रबन्धनाधिकारः।**
  - स्त्रीणां प्रबन्धनाधिकारः (मनुस्मृतिः ९.११)
  - स्त्रीणां शिक्षाधिकारः (मनुस्मृतिः ५.१५०)
  - स्त्रीणां साक्ष्याधिकारः (मनुस्मृतिः ८.६८) (नारद ४.१५५)
  - स्त्रीणां कर्तव्यम् (याज्ञवल्क्यस्मृतिः १.८३,८७)

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. भट्ट, श्रीयाज्ञिक देवण, (1988), स्मृतिचन्द्रिका, दिल्ली : नाग प्रकाशन।
2. हरगोविन्दशास्त्री, व्याख्याकार, (1992), मनुस्मृतिः (श्री कुल्लुकभट्ट टीका सहित), वाराणसी : चौखम्बा संस्कृत संस्थान।
3. पाण्डेय, उमेशचन्द्र, (1994), याज्ञवल्क्यस्मृतिः, वाराणसी : चौखम्बा संस्कृत संस्थान।
4. स्वांई, ब्रजकिशोर, (वि. सं. 2065), नारदस्मृतिः, वाराणसी : चौखम्बा संस्कृत संस्थान।

सहायकाः ग्रन्थाः (Additional Readings)

1. Kane, P. V., (1930), History of Dharmashastra, Pune : Bhandarkar Oriental Research Institute.
2. ठाकुर, लक्ष्मीदत्त, (1965), प्रमुख स्मृतियों का अध्ययन, लखनऊ : हिन्दी समिति सूचना विभाग।
3. श्रीमन्महर्षिप्रणीत, (1988), स्मृतिसंदर्भ, दिल्ली : नाग प्रकाशन।
4. काणे, पी. वी., (1992), धर्मशास्त्र का इतिहास (हिन्दी अनुवादक - अर्जुन चौबे कश्यप), लखनऊ : उत्तर प्रदेश हिन्दी संस्थान।
5. जोशी, लक्ष्मण शास्त्री, (वि. सं. 1994), धर्मकोष, बई सतरा : प्रजनपथशाला मण्डल।
6. गोयल, डॉ. प्रीति प्रभा, (2016), भारतीय संस्कृति, जोधपुर : राजस्थानी ग्रंथागार।
7. टण्डन, डॉ. किरण, (2017), भारतीय संस्कृति, दिल्ली : ईस्टर्न बुक लिंकर्स।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

गौणः पाठ्यक्रमः (Minor) 1.क.2: हिन्दू अध्ययनमूलतत्त्वानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. हिन्दूधर्मस्य समृद्धपरम्पराणाम्, आस्थानाम्, आचाराणाम्, दर्शनानां च अन्वीक्षणे सुविधाप्रदानम्।
2. मूलसिद्धान्तानन्तर्भाव्य हिन्दूधर्मस्य व्यापकावगमनम्।
3. हिन्दूधर्मस्य ऐतिहासिक-सांस्कृतिक-दार्शनिक-सामाजिकायामानामन्वेषणम्।
4. हिन्दूशास्त्राणाम्, अनुष्ठानानाम्, उत्सवानाम्, नैतिकसिद्धान्तानां च सैद्धान्तिक-व्यावहारिकपक्षयोः समीक्षणम्।
5. समसामयिकविश्वे सुखपूर्णसन्तुष्टजीवनयापनार्थं हिन्दूपरम्पराणां दार्शनिक-वैज्ञानिक-उपयोगितापरकपक्षाणां प्रामाणिकत्वस्य प्रासङ्गिकत्वस्य च अवगमनस्य विकासः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः -

1. हिन्दूधर्मस्य ऐतिहासिकपृष्ठभूमेः सांस्कृतिकसन्दर्भानाञ्च व्याख्याकरणे समर्थाः भविष्यन्ति।
2. हिन्दूधर्मस्य प्रधानदार्शनिकसम्प्रदायान् संकल्पनानि च परीक्षिष्यन्ति।
3. वेद-उपनिषद्-भगवद्गीता-पुराणादीनां महत्त्वप्रतिपादनं करिष्यन्ति।
4. हिन्दूपूजानां दैनन्दिनजीवनसम्बद्धानाचारान् वक्तुं शक्ष्यन्ति।
5. हिन्दूधर्मस्य सामाजिक-सांस्कृतिक-नैतिकायामानां वर्णनं कर्तुं शक्ष्यन्ति।
6. हिन्दूपदेशानामाचाराणां च प्रासङ्गिकतां वर्णयितुं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 1.क.2	हिन्दू अध्ययनमूलतत्त्वानि	04	0	0	04

पाठ्यक्रमस्य विवरणम् (Details of Course)

अन्वितिः १. हिन्दूधर्मपरिचयः। **श्रेयोऽङ्कः १**

- हिन्दूधर्मे मुख्यपदानां संकल्पनानां च परिचयः।
- हिन्दूधर्मस्य ऐतिहासिकपृष्ठभूमिः सांस्कृतिकसन्दर्भश्च।
- हिन्दूधर्मस्य पवित्रशास्त्राणि।
- वेदाः, हिन्दूधर्मे तेषां महत्त्वञ्च।
- उपनिषदां परिचयः, तासु प्रतिपादिता दार्शनिकशिक्षा च।

- हिन्दूचिन्तने भगवद्गीतायाः भूमिकायाः समीक्षा।

अन्वितिः २. हिन्दूदार्शनिकप्रणाली। **श्रेयोऽङ्कः १**

- हिन्दूधर्मस्य प्रधानदार्शनिक-सम्प्रदायानामवलोकनम्।
- आत्मन् – ब्रह्मन् – कर्म - मोक्षादिमुख्यसंकल्पनानां विश्लेषणम्।
- **हिन्दूदेवताः पुराणकथाश्च -**
    - हिन्दूधर्मस्य ब्रह्मा-विष्णु-शिव-देवी-तदवतारसहितानां प्रधानदेवतानां परिचयः।

अन्वितिः ३. हिन्दू-अनुष्ठानानि पूजा च। **श्रेयोऽङ्कः १**

- हिन्दू-अनुष्ठानानां परिचयः,धार्मिक-सामाजिकजीवने तेषां भूमिकायाश्चाध्ययनम्।
- प्रधानहिन्दू-उत्सवानां परिचयः, तेषां महत्त्वस्य च समीक्षा।
- हिन्दूधर्मे पवित्रस्थानानां, मन्दिराणां, तीर्थयात्रायाश्च परिचयः।
- **हिन्दूधर्मे नीतिः सदाचारश्च -**
    - हिन्दूनैतिकसिद्धान्तानां धर्म-कर्मणोश्च विश्लेषणम्।
    - हिन्दूधर्मे नैतिकदायित्वस्य धर्माचरणस्य च संकल्पनाविषये चर्चा।

अन्वितिः ४. समसामयिकविषयाः हिन्दूधर्मश्च। **श्रेयोऽङ्कः १**

- आधुनिकविश्वे हिन्दूधर्मस्य आह्वानानामनुकूलनानां चान्वेषणम्।
- हिन्दूराष्ट्रवादस्य, धर्मनिरपेक्षतायाः, धार्मिकबहुलवादस्य च विश्लेषणम्।
- वैश्विकाह्वानानां समाधाने हिन्दूपदेशानामाचाराणां च प्रासङ्गिकता।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Müller, F. M. (1879). Sacred books of the East. Oxford: Clarendon Press.
2. Mahadeva Sastri, A. (Trans.). (1901). The Bhagavad-Gita: With the commentary of Sri Sankaracarya (2nd ed.). Mysore: G.T.A. Printing Works.
3. Bhagavadgita (with translation and commentary in Hindi). (n.d.). Gorakhpur: Gita Press.
4. Radhakrishnan, S., & Moore, C. A. (Eds.). (1992). A sourcebook in Indian philosophy. Princeton, NJ: Princeton University Press.
5. Hiriyanna, M. (1997). Outlines of Indian philosophy. Delhi: Motilal Banarsidass.
6. Puligandla, R. (1997). Fundamentals of Indian philosophy. Delhi: DK Printworld.
7. Ranganathananda, Swami. (2001). Introduction. In The universal message of the Bhagavadgita (pp. 9–38). Kolkata: Advaita Ashrama.
8. Raju, P. T. (2009). The philosophical traditions of India. Delhi: Motilal Banarsidass.
9. Harshananda, Swami. (2012). Hindu gods and goddesses. Mylapore, Madras: Shri Ramakrishna Math.
10. Mishra, J. C. (2012). Bharatiya darshana (Indian philosophy). Varanasi: Chowkhamba Surbharati Prakashan.
11. Sharma, C. (2013). A critical survey of Indian philosophy. Delhi: Motilal Banarsidass.
12. Kaul, K. (2014). The great Upanishadic: Understanding Brahman and the ultimate reality.
13. Chatterji, S. C., & Datta, D. M. (2015). An introduction to Indian philosophy. Delhi: Motilal Banarsidass.
14. Hiriyanna, M. (2015). The essentials of Indian philosophy. Delhi: Motilal Banarsidass.

15. Radhakrishnan, S. (2016). The principal Upanishads. Gurugram: HarperCollins.
16. Dasgupta, S. (2018). A history of Indian philosophy (Vols. 1–2). Delhi: Rupa Publications India.
17. Hindu philosophy of life and Indian thinkers: Selected readings on Hindu and Hindutva. (2024). New Delhi: Motilal Banarsidass & Bharatiya Vidya Adhyayan Kendra.

सहायकाः ग्रन्थाः (Additional Readings)

1. काणे, पी. वी., *धर्मशास्त्र का इतिहास* (हिन्दी अनुवादक – अर्जुन चौबे कश्यप), उत्तर प्रदेश हिन्दी संस्थान, लखनऊ, 1992.
2. *Encyclopedia of Hinduism* (11 Volumes), Rupa Publications, New Delhi, 2012, International Edition: Mandala Publications, USA, 2013.

काठिन्यस्तरः

100-199

श्रेयोऽङ्काः - 4

होराः - 60

गौणः पाठ्यक्रमः (Minor) 1.क.3: योगदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. योगदर्शनस्य परिभाषायाः सामान्यसिद्धान्तानां च परिचयः।
2. योगदर्शनस्य लक्ष्योद्देश्ययोः छात्रेभ्यः ज्ञापनम्।
3. जीवने साम्यस्य महत्त्वविषये बोधं विकासयितुं सन्तुलितजीवनस्य सैद्धान्तिकव्यावहारिकपक्षयोः निपुणतायाः प्रदानम्।
4. पातञ्जलयोगदर्शने श्रवणमनननिदिध्यासनानि आवश्यकसाधनानीति ज्ञापनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. योगदर्शनस्य परिचयं वक्तुं शक्ष्यन्ति।
2. योगदर्शनस्य महत्त्वपूर्णसाधनेषु श्रवणमनननिदिध्यासनेषु लघुटिप्पणीः लेखिष्यन्ति।
3. अभ्यासवैराग्योः स्वजीवने महत्त्वं योगदानञ्च वर्णयिष्यन्ति।
4. अष्टाङ्गयोगस्य मूलसिद्धान्तान् निरूपयिष्यन्ति।
5. मोक्षाय पातञ्जलयोगस्य पञ्च बाह्यान् त्रीन् आभ्यन्तरान् च मार्गान् संख्यास्यन्ति।
6. सन्तुलितव्यक्तित्वविकासे साधनरूपस्य पञ्चकोशस्य भूमिकां स्वीकरिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 1.क.3	योगदर्शनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. **श्रेयोऽङ्कः १**

- योगदर्शनस्य परिचयः इतिहासश्च।
- योगमनोविज्ञानम्।
- आत्मप्रस्तुतेः उपायाः - श्रवणं, मननं, निदिध्यासनं च (बृहदारण्यकोपनिषत् 2.4.5) (वेदान्तसारः)

अन्वितिः २. **श्रेयोऽङ्कः १**

- योगस्य परिभाषा (योगसूत्रम्)
- अभ्यासवैराग्याभ्यां वृत्तिनिरोधः (योगसूत्रम्)
- धारणा।

अन्वितिः ३. **श्रेयोऽङ्कः १**

- योगस्याष्टाङ्गानि (अष्टाङ्गयोगः)
- क्रियायोगः।
- एकत्वप्रापकानि चित्तप्रसादनस्य चत्वारि विशिष्टसाधनानि।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- पञ्चकोशाः - व्यक्तित्वसिद्धान्तः (महतो भारतीयमनोविज्ञानस्य पञ्च अन्तर्दृष्टयः)
- श्री अरविन्दस्य पूर्णयोगसंकल्पना (Integral Yoga)

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Aranya, H. (1963). *Yoga Philosophy of Patanjali*. University of Calcutta.
2. गीताप्रेस, (1993), *बृहदारण्यकोपनिषद् (सानुवाद शांकरभाष्यसहित)*, गोरखपुर : गीताप्रेस।
3. गीताप्रेस, (1993), *तैत्तिरीयोपनिषद् (सानुवाद शांकरभाष्यसहित)*, गोरखपुर : गीताप्रेस।
4. Dasgupta, S. *A History of Indian Philosophy (Vols. 1–5)*. Motilal Banarsidass.
5. Radhakrishnan, S. *Indian Philosophy (Vols. 1 & 2)*. Oxford University Press.
6. Radhakrishnan, S. *The Principal Upanishads*. HarperCollins Publishers.
7. Aurobindo, S. *The Upanishads: Translations and Commentaries*. Sri Aurobindo Ashram.

सहायकाः ग्रन्थाः (Additional Readings)

1. Ume, R. E. (1921). *The Thirteen Principal Upanishads*. Oxford: Oxford University Press.
2. Winternitz, M. (1988). *History of Indian Literature (Vol. 1, Part 1)*. Delhi: Motilal Banarsidass.
3. Iyengar, B. K. S. (2021). *Light on the Yoga Sutras of Patanjali*. New York: HarperCollins.
4. Chatterjee, S. C., & Datta, D. M. *An Introduction to Indian Philosophy*. Calcutta: University of Calcutta.
5. Gambhirananda, S. *Eight Upanishads with Commentaries of Shankaracharya*. Kolkata: Advaita Ashrama.
6. Satchidananda, S. *The Yoga Sutras of Patanjali*. Buckingham, VA: Integral Yoga Publications.
7. Bryant, E. F. *The Yoga Sūtras of Patañjali: A New Edition, Translation and Commentary*. New York: North Point Press.

द्वितीयवर्षः

(गौणपाठ्यक्रमाः)

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

गौणः पाठ्यक्रमः (Minor) 2.क.1: भारतीयं सौन्दर्यशास्त्रम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साहित्यविमर्शस्य अध्ययनार्थं महत्त्वाधायि-प्रमुखक्षेत्रत्वेन सौन्दर्यशास्त्रस्य प्रवर्तनम्।
2. भारतीयसौन्दर्यशास्त्रान्तर्भूतानां सामाजिक-सांस्कृतिक-साहित्यिक-व्यावहारिकाणाम् आयामानां परस्परनिर्भरतायाः संवीक्षणम्।
3. सौन्दर्यसिद्धान्तानाम् आलोके काव्य-नाट्य-संगीत-वास्तु-प्रतिमा-चित्रकलादीनां विषये भारतीयानां मन्तव्यानाम् आविष्करणम्।
4. भारतीयसौन्दर्यशास्त्रे समाहितानां प्रमुखप्रवृत्तीनां विचारसरणीनां सम्मुखीकरणम्, समकालीनप्रवृत्तिभिश्च सह तेषां सङ्गत्याः मूल्याङ्कनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. सौन्दर्यशास्त्रस्य परिचयं महत्त्वञ्च वक्तुं शक्ष्यन्ति।
2. मुख्यसौन्दर्यतत्वानि - अलंकारः, रीतिः, ध्वनिः, वक्रोक्तिः औचित्यञ्च विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।
3. भारतीयैः अलङ्कारशास्त्रिभिः प्रतिपादितस्य सौन्दर्यजातस्य भावम् अभिज्ञास्यन्ति।
4. रस-रसास्वादरूपस्य च सौन्दर्यानुभवस्य सन्दर्भे भारतीयविमर्शस्य वर्णनं करिष्यन्ति।
5. प्रमुखाणां पारम्परिकभारतीयानां सौन्दर्यशास्त्रिणां विवरणं वर्णयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 2.क.1	भारतीयं सौन्दर्यशास्त्रम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सौन्दर्यशास्त्रं, तस्य स्वरूपं घटकाश्च। **श्रेयोऽङ्कः १**

- सौन्दर्यशास्त्रम् - तस्य परिभाषा, प्रकृतिः, महत्त्वञ्च।
- सौन्दर्यशास्त्रस्य घटकानि - वयः, रूपं, वचनं, चेष्टादयः।
- सौन्दर्यपदस्य समानार्थकानां विषये चर्चा -
    - रमणीयता।
    - लावण्यम्।

- चारुत्वम्
- कान्तिः।
- माधुर्यम्।
- मनोहारित्वम्।
- सुषमा।
- अभिरामता।

अन्वितिः २. सौन्दर्यानुभवस्य प्रक्रिया (रसास्वादः) **श्रेयोऽङ्कः १**

- रसस्य घटकानि –
  - भावः (मानवानुभवाः भावनाश्च)
  - विभावः (कारकाः निर्धारकाः वा)
  - अनुभावः (स्वैच्छिक-संकेताः)
  - सात्विकाः भावाः (अनैच्छिक-संकेताः)
  - व्याभिचारिभावाः (क्षणिकावस्थाः)
  - स्थायिभावाः (मौलिकी मानसावस्था)
  - सहृदयाः सामाजिकाः (रसिकाः दर्शकाः)
  - अनुकार्यम्।
  - अनुकर्ता।
  - साधारणीकरणम् (सामान्यीकरणम्)
  - रससाक्षात्कारस्य चत्वारः मानसावस्थाः –
    - विकासः (आह्लादः)
    - विस्तारः (उत्कर्षः)
    - क्षोभः (आन्दोलनम्)
    - विक्षेपः चेति।
- भरतानुसारेण रसानां संख्या।
- साहित्यदर्पणानुसारेण रसानां स्वरूपं, सौन्दर्यानुभूतिः, सौन्दर्यानन्दः, शाश्वतानन्दः, चरमं सत्यं च (आनन्दमयत्वम् अलौकिकत्वम्)

अन्वितिः ३. सौन्दर्यतत्त्वानि। **श्रेयोऽङ्कः १**

- सौन्दर्यस्य अभिव्यक्तिमाध्यमत्वेन कलाः - वास्तुकला, मूर्तिकला, चित्रकला, संगीतं च।

- साहित्यिकानां कलानां (काव्यनाटकानां) मुख्यानि सौन्दर्यतत्वानि - अलंकारः, रीतिः, ध्वनिः, वक्रोक्तिः औचित्यञ्च।

अन्वितिः ४. अभिज्ञानशाकुन्तले सौन्दर्यशास्त्रम्, सौन्दर्यबोधस्य च प्रमुखविचारकाः। श्रेयोऽङ्कः १

- भरतः, भामहः, वामनः, आनन्दवर्धनः, राजशेखरः, अभिनवगुप्तः, मम्मटः, विश्वनाथः, रूपगोस्वामी, पण्डितराजः जगन्नाथश्च।
- अभिज्ञानशाकुन्तलस्य सन्दर्भे नाटकेषु सांस्कृतिक-सामाजिकदृष्ट्या सौन्दर्यबोधः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Vishvanatha. (1936). *Sāhityadarpaṇa (Based on Kārikās 3/1–28).* Bombay: Nirnaya-Sagar Press.
2. पाण्डेय कान्तिचन्द्र, (1978). *स्वतन्त्र कलाशास्त्र, प्रथम भाग.* वाराणसी : चौखम्भा संस्कृत सीरीज।
3. चतुर्वेदी ब्रजमोहन, (1989). *भारतीय सौन्दर्यदर्शन.* मध्यप्रदेश हिन्दी ग्रन्थ अकादमी।
4. Pandey, K. (2009). *Comparative aesthetics* (Vol. 1). Varanasi: Chowkhamba Sanskrit Series Office.
5. Kane, P. V. *History of Sanskrit poetics* (pp. 352–391). Delhi: Motilal Banarsidass Publishers.

सहायकाः ग्रन्थाः (Additional Readings)

1. Coomaraswamy, A. K. (1956). Introduction to Indian Art. Adyar: Theosophical Society.
2. उपाध्याय, बलदेव (1963), संस्कृत-आलोचना, हिन्दी समिति, उत्तर प्रदेश: सूचना विभाग।
3. पाण्डेय, के. (1967 & 1978), स्वतन्त्र कलाशास्त्र (प्रथम तथा द्वितीय भाग), वाराणसी : चौखम्भा संस्कृत सीरीज।
4. Gnoli, R. (1985). The Aesthetic Experience according to Abhinavagupta. Varanasi: Chowkhamba Sanskrit Series Office.
5. कृष्णकुमार, (1998), अलंकारशास्त्र का इतिहास, मेरठः साहित्य भण्डार।

काठिन्यस्तरः

100-199

श्रेयोऽङ्काः - 4

होराः - 60

गौणः पाठ्यक्रमः (Minor) 2.A.2: संस्कृतकथाशास्त्रम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृतकथाशास्त्रस्य मौलिकपक्षाणां परिचयः।
2. संस्कृतसाहित्ये आख्यानपरम्पराणाम् उत्पत्ति-विकासाभ्यां छात्राणामभिज्ञानम्।
3. संस्कृत-आख्यानानां वैशिष्ट्यस्य, कार्यरूपस्य च परिचयः।
4. बृहत्कथा, कथासरित्सागरः, बृहत्कथामंजरी इत्यादीनां प्रमुखानाम् आख्यानग्रन्थानामध्ययनार्थं विश्लेषणार्थञ्च अवसरप्रदानम्।
5. पंचतन्त्रम्, हितोपदेशः, बेतालपंचविंशतिकादीनां ग्रन्थानां माध्यमेन अध्येतॄणां कथनकौशलविकासः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं विद्यार्थिनः छात्राः -

1. संस्कृताख्यानानाम् उत्पत्तिः विकासश्च वर्णयितुं सिद्धाः भविष्यन्ति।
2. संस्कृतकथाशास्त्रस्य वैशिष्ट्यं व्याख्यातुं शक्ताः भविष्यन्ति।
3. नृत्य-नाट्य-चित्र-शिल्पादीनां विविधकलारूपान् वक्तुं शक्ष्यन्ति।
4. पंचतन्त्र-हितोपदेशादिकथाग्रन्थानां जीवने महत्त्वं व्याख्यातुं शक्ताः भविष्यन्ति।
5. संस्कृतकथाशास्त्राणां विशिष्टगुणानां कार्याणां वर्णनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 2.क.2	संस्कृतकथाशास्त्रम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. संस्कृताख्यानानाम् उत्पत्तिः विकासश्च। **श्रेयोऽङ्कः १**

- वेदेषु आख्यानानाम् उत्पत्तिः –
  - ऋग्वैदिकानि संवादसूक्तानि।
  - नाराशंसीयाः गाथाः।
  - औपनिषदिकानि आख्यानानि।
- इतिहासपुराणपरम्परा।

- बृहत्कथा तस्य संस्कृतसंशोधनानि च - बृहत्कथा श्लोकसंग्रहः, कथासरित्सागरः, बृहत्कथामंजरी।
- संस्कृते दन्तकथानाम् उत्पत्तिः विकासश्च - पंचतन्त्रम्, हितोपदेशः, बेतालपंचविंशिका, सिंहासनद्वात्रिंशिका, पुरुषपरीक्षा, शुकसप्ततिः।

अन्वितिः २. संस्कृतकथाशास्त्रस्य वैशिष्ट्यं विचक्षणत्वं च। **श्रेयोऽङ्कः १**

- **संस्कृतकथाशास्त्राणां वैशिष्ट्यानि** –
  - आन्तरिकीकरणम् (Interiorization)
  - धारावाहिकीकरणम् (Serialisation)
  - काल्पनिकीकरणम् (Fantasisation)
  - चक्रीकरणम् (Cyclicalisation)
  - रूपकीकरणम् (Allegorisation)
  - अनामीकरणम् (Anonymisation)
  - कालस्य लोचनीकरणम् (Elasticisation of Time)
  - स्थानीकरणम् (Spatilisation)
  - शैलीकरणम् (Stylisation)
  - आशुरचना (Improvisation)
- **कथावाचन-संस्थाः गतिविधयश्च।**
  - संस्कारात्मकेन, आध्यात्मिकेन, मनोरंजनात्मकेन शैक्षणिकेन चोद्देश्येन कथावाचनम्।
  - सामाजिकवर्गत्वेन कथावाचकाः - कुशीलवाः, चारणाः, सूताः।

अन्वितिः ३. संस्कृतकथानां माध्यमत्वेन कलारूपाः। **श्रेयोऽङ्कः १**

- कथासत्राणि (कथावाचनसंगोष्ठी), नाटकम्, नृत्यविधाः, गुहाचित्राणि, लघुचित्राणि मूर्तिकला च।

अन्वितिः ४. पञ्चतन्त्रस्य सांस्कृतिकं समावेशनम्। **श्रेयोऽङ्कः १**

- विभिन्नसंस्कृतिषु विभिन्नराष्ट्रेषु च पञ्चतन्त्रस्य अभ्युपगमनम्, पुनर्नवीकरणम् पुनःकथनं च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Hertel, J. (1908–1915). *The Pañcatantra: A collection of ancient Hindu tales, in the recension called Pañcākhyānaka and dated 1199 A.D., of the Jaina monk.* (Publication details incomplete).
2. Edgerton, F. (1924). *The Pañcatantra reconstructed* (Vol. 1: Text and critical apparatus, Vol. 2: Introduction and translation). New Haven, CT: American Oriental Series.
3. Krishna, A. (1973). *A reassessment of the Tuti-Nama illustrations in the Cleveland Museum of Art.* (Publication details not provided).

4. Winternitz, M. (1978). *Some problems of Indian literature.* Delhi: Munshiram Manoharlal.
5. Sadhale, N. (1986). *Katha in Sanskrit poetics.* Hyderabad: Sanskrit Academy, Osmania University.
6. Krishna, D. (1987). *India's intellectual tradition.* Delhi: ICPR.
7. Mahulikar, G. (2002). *Effect of Ramayana on various cultures and civilizations.* Ramayana Institute.
8. Paniker, K. A. (2003). *Indian narratology.* Delhi: IGNCA.
9. *Illustrated lecture on the westward migration of Panchatantra from India.* (2009). London: ICR. [Video].
10. Dev, A. (Ed.). (2017). *Narrative, a seminar.* Delhi: Sahitya Akademi.
11. Raghavan, V. (Ed.). *The Rāmāyaṇa tradition in Asia.*

सहायकाः ग्रन्थाः (Additional Readings)

1. पद्मभूषण आचार्य श्री बलदेव उपाध्याय (प्रधान सम्पादक), (1997), संस्कृत-वाङ्मय का बृहद् इतिहास (प्रथम खण्ड), लखनऊ: उत्तर प्रदेश संस्कृत संस्थान।
2. डॉ. गङ्गासागर राय, (2017), वैदिक आख्यान, वाराणसी : चौखम्भा विद्याभवन।

काठिन्यस्तरः

100-199

श्रेयोऽङ्काः - 4

होराः - 60

गौणः पाठ्यक्रमः (Minor) 2.क.3: भारतीयदर्शनस्य मौलिकसिद्धान्ताः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मौलिकानां सन्दर्भानां लक्ष्यानां च सार्धं भारतीयदार्शनिकपरम्परायाः मौलिकसिद्धान्तानां परिचयः।
2. विविधानां भारतीयदार्शनिकसम्प्रदायानां वर्गीकरणं गुणधर्मांश्च प्रस्तोतॄणां ग्रन्थानाम् उपपादनम्।
3. भारतीयदर्शनान्तर्भूतैः मौलिकविषयैः परिचर्चाभिश्च साकं विद्यार्थिणाम् अभिज्ञानम्।
4. भारतीयदर्शनस्य नास्तिकसम्प्रदायानाम् आधारभूतसिद्धान्तानां व्याख्यापुरस्सरं तेषां मूलसिद्धान्तानां व्याख्यानम्।
5. आस्तिकसम्प्रदायानां प्रमुखसिद्धान्तान् प्रकाशयितुं, तेषां ज्ञानशास्त्रीयाणाम्, आध्यात्मिकानां, नीतिशास्त्रीयाणां च गुणधर्माणाम् अभिद्योतनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयसन्दर्भे दर्शनस्य महत्त्वं योगदानञ्च वर्णयिष्यन्ति।
2. भारतीयदर्शनस्य द्वयोः सम्प्रदाययोः सकारणं विभेदं कर्तुं समर्थाः भविष्यन्ति।
3. भारतीयदर्शनस्य मौलिकसन्दर्भाणां विशेषतः प्रमाणमीमांसायाः विवेचनं विधास्यन्ति।
4. नास्तिकदृष्ट्या ब्रह्म-आत्मन-पदार्थ-कर्म-पुनर्जन्म-मोक्षादीनां च वर्णनं कर्तुं शक्ष्यन्ति।
5. भारतीयदर्शनस्य द्वयोः सम्प्रदाययोः सकारणं विभेदं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 2.क.3	भारतीयदर्शनस्य मौलिकसिद्धान्ताः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. दर्शनस्य मौलिकसिद्धान्ताः। **श्रेयोऽङ्कः १**

- **दर्शनम् –**
  - अवधारणा उद्देश्यानि च।
  - भारतीयानां दार्शनिकसम्प्रदायानां वर्गीकरणम्।
  - भारतीयदर्शनानां मौलिकसिद्धान्ताः प्रमाणमीमांसा च।

अन्वितिः २. तत्वमीमांसा। **श्रेयोऽङ्कः १**

- सत्कार्यवादः।
- असत्कार्यवादः।
- परिणामवादः।
- विवर्तवादः।
- स्वभाववादः।
- चैतन्यं पदार्थश्च।
- आचारविषयकाः सिद्धान्ताः।
- कर्म-पुनर्जन्म-मोक्षादयः।

अन्वितिः ३. भारतीयाः दर्शनसम्प्रदायाः। **श्रेयोऽङ्कः १**

- नास्तिकसम्प्रदायाः - .
  - चार्वाकमतम् – वेदप्रत्याह्वानं, पारलौकिकसत्तानाम् अस्वीकरणम्, आचारादिषु बलसहितं सामान्यपरिचयः।
  - जैनधर्मः - अनेकान्तवाद-स्याद्वाद-सप्तभंगिन्यायसहितं सामान्यपरिचयः।
  - बौद्धधर्मः - चतुर्षु आर्यसत्येषु बलसहितं सामान्यपरिचयः।

अन्वितिः ४. आस्तिकसम्प्रदायाः। **श्रेयोऽङ्कः १**

- **सांख्यः** – प्रकृति-त्रिगुण-पुरुषादिषु (सांख्यकारिकाधारितेषु) विशेषावधानसहितं सामान्यपरिचयः।
- योगः - योगस्य अष्टांगमार्गः।
- न्यायवैशेषिकदर्शने – सप्तपदार्थानां सामान्यपरिचयः।
  - मीमांसा - स्वतःप्रामाण्यावादः।
  - अद्वैतवेदान्तः - ब्रह्म-माया-जीव-जगदादीनां सामान्यपरिचयः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Shastri, K. (1951). *A primer of Indian logic*.
2. Hiriyanna, M. (1956). *Outline of Indian philosophy* (Also available in Hindi translation). London.
3. Pandey, R. C. (1966). *Panorama of Indian philosophy* (Also available in Hindi). Delhi: Motilal Banarsidass.
4. Chatterjee, S. C., & Datta, D. M. (1968). *Introduction to Indian philosophy*. Calcutta: Calcutta University.
5. Raja, K. (1974). *Some fundamental problems in Indian philosophy*. Delhi: Motilal Banarsidass.

6. Bhartiya, M. (1975). *Causation in Indian philosophy*. Ghaziabad.
7. Rishi, U. S. (Ed.). (1984). *Sarva-darśana-saṃgraha*. Varanasi: Chowkhamba Vidyabhawan.
8. Bhartiya, M. (1999). *Bharatiya darśana kī pramukha samasyaem*. Ghaziabad.
9. मिश्र, प., (2013). *तर्कसंग्रह तन्वी व्याख्या*. दिल्ली : परिमल पब्लिकेशन्स।
10. मिश्र, प., (2019), *चार्वाक*, दिल्ली : शिवालिक प्रकाशन।
11. शर्मा, च, *भारतीय दर्शन*, दिल्ली : मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. Shastri, Kuppuswami. (1951). *A primer of Indian logic (only introduction).*
2. Hiriyanna, M. (1956). *Outline of Indian philosophy (also Hindi translation).* London.
3. Pandey, Ram Chandra. (1966). *Panorama of Indian philosophy (also Hindi version).* Delhi: M.L.B.D.
4. Chatterjee, S. C. (1968). *The Nyāya theory of knowledge.* Calcutta.
5. Raja, Kuhnan. (1974). *Some fundamental problems in Indian philosophy.* Delhi: MLBD.
6. Bhartiya, Mahesh. (1975). *Causation in Indian philosophy.* Ghaziabad.
7. Radhakrishnan, S. (1990). *Indian philosophy.* Delhi: Oxford University Press.

तृतीयवर्षः

(गौणपाठ्यक्रमाः)

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

गौणः पाठ्यक्रमः (Minor) 3.क.1: वैदिकगणितं ज्योतिषशास्त्रञ्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. शिक्षार्थिभ्यः भारतीय-ज्ञानपरम्परया सह वैदिकगणित-ज्योतिषशास्त्रयोः परिचयः।
2. भारतीयगणितज्योतिषशास्त्रयोः संक्षिप्तेतिहासस्य तथा भारतीयगणितज्योतिषशास्त्रसम्बद्धानां प्रमुखग्रान्थानां परिचयः।
3. प्राचीनभारतवर्षस्य खगोलशास्त्रीयगणनायाः ज्यामिति-सिद्धान्तानाञ्चोद्देश्यनिष्कर्षयोः सांस्कृतिक-वैज्ञानिकमहत्वस्य वर्णनम्।
4. प्राचीनभारतीयगणितसूत्राणां विशिष्टविवेचनाय बीजगणित-गणना-संख्यासिद्धान्तानाञ्च प्रारम्भिक्याः अवधारणायाः प्रस्तुतिः।
5. शिक्षार्थिभ्यः प्राचीनभारतीयगणितप्रक्रियायाः मूलभूतस्य व्यावहारिकपक्षस्य (यथा- संख्या-अङ्क-शून्य-अनन्त-दशमलवपद्धति-वर्गमूलानाञ्चावधारणाः) परिचयः।
6. प्राचीनवैज्ञानिकसिद्धान्तैः सह प्रमुखभारतीयखगोलनिरीक्षणपद्धत्याः मूल्याङ्कनं तस्य प्रासङ्गिकतायाः प्रकाशनञ्च।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः -

1. प्राचीनभारतीयगणितखगोलशास्त्रप्रणाल्याः ज्ञानं वर्णयितुं शक्ष्यन्ति।
2. प्राचीनभारतीयग्रन्थानां लेखकानां च नामानि वर्णयितुं शक्ष्यन्ति।
3. स्वामिभारतीकृष्णतीर्थकृतवैदिकगणितग्रन्थस्य विवरणं प्रदातुं शक्ष्यन्ति।
4. अङ्कगणितस्य बीजगणितस्य ज्यामितेश्च सूत्राणां गणितीयखगोलीयप्रयोगसहितं विवरणं दातुं शक्ष्यन्ति।
5. खगोलीयगणनार्थं प्राचीनपर्यवेक्षणप्रणालीनां साधनानां च प्रयोगकर्तुं शक्ष्यन्ति।
6. भारतीयगणितज्योतिषशास्त्रयोः वर्णनं कर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 3.क.1	वैदिकगणितं ज्योतिषशास्त्रञ्च	04	0	0	04

पाठ्यक्रमस्य विवरणम् (Details of Course)

अन्विति: १ **श्रेयोऽङ्कः १**

- **लगधज्योतिषम्** - खगोलीयमापनस्य उद्देश्यानि परिणामाश्च।
- गणितस्य महत्त्वं त्रिचरनियमाश्च।

अन्वितिः २ **श्रेयोऽङ्कः १**

- स्वामीभारतीकृष्णतीर्थस्य **वैदिकगणितम्** (आदितः पञ्चसूत्राणि)
- प्रा**विधिकपदानि** –
    - गणितस्य शाखाः (Types of Mathematics)
    - बीजगणितम् (Algebra)
    - अमूर्त्तगणितम् (Abstract)
    - गणना (Calculus)
    - संख्यासिद्धान्तः (Number theory)
    - अनुप्रयुक्तगणितम् (Applied)
    - गातिजविज्ञानम् (Kinetic Science)
    - स्थैतिकविज्ञानम् (Static Science)
    - प्रमुखगणितीयपारिभाषिकशब्दाः –
        - संख्या (Number)
        - अङ्कः (Digits)
        - शून्यम् (Zero)
        - अनन्तम् (Infinite)
        - दशमलवः (Decimal)
        - वर्गः (Square)
        - वर्गमूलम् (Square-root)
        - घनः (Cube)
        - घनमूलम् (Cube-root)
        - कर्णः (Hypotenuse)
        - चापः (Arc)
        - ज्या (Sine)
        - को-ज्या (Cosine)
        - स्पर्श-ज्या (Tangent)
        - आयतनम् (Volume)
        - मूलम् (Root)
        - करणी (Surd)
        - समीकरणम् (Equation)
        - सूत्रम् (String)
        - कोणम् (Angle)

अन्वितिः ३ **श्रेयोऽङ्कः १**

- भारतीयगणितज्योतिषशास्त्रयोः संक्षिप्तेतिहासः -
    - वेदाङ्गज्योतिषम्।
    - शुल्बसूत्रम्।
    - पञ्चसिद्धान्तिका।
    - सूर्यसिद्धान्तः।
    - आर्यभट्टः प्रथमः।
    - वहारमिहिरः।
    - ब्रह्मगुप्तः।
    - आर्यभट्टः द्वितीयः।
    - श्रीपतिः।
    - भास्कराचार्यः।
    - कमलाकरः।
    - जयसिंहः।

अन्वितिः ४ **श्रेयोऽङ्कः १**

- प्राचीनखगोलीयमापनस्य यन्त्राः वेधशालाश्च -
- नाडीवलययन्त्रम्।
- यागोत्तरीतुरीयन्त्रम्।
- सम्राटपलभयन्त्रम्।
- शङ्कुयन्त्रम्।
- तारामण्डलम्।
- चक्रयन्त्रम्।
- याम्योत्तर-धरातलीय-तुरीय-यन्त्रम्।
- क्रान्तिवृत्तयन्त्रम्।
- तुला-मकरराशिवलययन्त्रम्।
- षष्ठांशयन्त्रम्।
- जयपुरवेधशाला (जयसिंहनिर्मिता)
- काशीवेधशाला।
- देहलीस्थजन्तर-मन्तरः (वेधशाला)

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Aryabhata. (1976). *Aryabhatiya of Aryabhata: With the commentary of Bhaskara I and Somesvara* (K. S. Shukla, Ed.). New Delhi: Indian National Science Academy.
2. कपिलेश्वर शास्त्री मैथिल, (1987). *सूर्यसिद्धान्त (श्री तत्त्वामृतभाष्योपपत्ति टिप्पणी सहित)*. वाराणसी : चौखम्बा संस्कृत संस्थान।

3. लगधाचार्य, सोमाकर, (2008). *लगधज्योतिष (याजुष् व आर्य संस्करण) (सुधाकर भाष्य, लघुविवरण टीका, हिन्दी अनुवाद डॉ. पुनीता शर्मा द्वारा).* दिल्ली : नाग पब्लिशर्स।
4. Tirthaji Maharaja, J. S. B. K. *Vedic mathematics.* Delhi: Motilal Banarsidass.

सहायकाः ग्रन्थाः (Additional Readings)

1. गोरखप्रसाद, (1974), *भारतीय ज्योतिष का इतिहास,* लखनऊ : उत्तर प्रदेश हिन्दी संस्थान, हिन्दी समिति ग्रन्थमाला।
2. दीक्षित, शं. बा. (1990), *भारतीय ज्योतिष (मूलतः मराठी में) (हिन्दी अनुवाद: शिवनाथ झारखण्डी).* लखनऊ : उत्तर प्रदेश हिन्दी संस्थान, हिन्दी समिति ग्रन्थमाला।
3. शर्मा, कल्याणदत्त, (1994), *वेधशाला परिचय.* दिल्ली : लालबहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठ।
4. द्विवेदी, भोजराज, (2002), *आचार्य वराहमिहिर का ज्योतिष में योगदान,* दिल्ली : रञ्जन पब्लिकेशन।

काठिन्यस्तरः

100-199

श्रेयोऽङ्काः - 4

होराः - 60

गौणः पाठ्यक्रमः (Minor) 3.क.2: संस्कृते शब्दकोशपरम्परा

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृतशिक्षार्थिभ्यः संस्कृतशिक्षणेन सह शब्दकोशनिर्माणसिद्धान्तैः पद्धतिभिश्च सह परिचयः। अस्याः समृद्धशब्दकोशपरम्परायाः प्रस्तुतिश्च।
2. संस्कृतशब्दकोशपरम्परायाः समृद्धये प्रासङ्गिकैतिहासिकदृष्टेः निर्धारणम्।
3. संस्कृतशब्दकोशपरम्परायाः समृद्धौ सर्वानुक्रमणी, निघण्टुः, निरुक्तमित्यादीनां प्रमुखग्रन्थानां भूमिका।
4. शिक्षा-प्रातिशाख्यग्रन्थानामाधारनिर्माणे धातुपाठ-गणपाठयोः महत्त्वम्।
5. संस्कृतशब्दकोशस्य संरचनायाः व्याप्तेश्च स्वरूपनिर्धारणे प्राचीन-अर्वाचीनयोः कोशकाराणां योगदानस्य समीक्षणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः -

1. संस्कृतकोशानां समृद्धपरम्परायाः वर्णनं कर्तुं शक्ष्यन्ति।
2. संस्कृतकोशसम्बद्धानां परम्परागतानाम् आधुनिकानां च कार्याणां विस्तृतदृष्टिकोणं प्रदातुं शक्ष्यन्ति।
3. मुख्यकोशानां तैः निर्मितानां कोशप्रकाराणां च परिचयं दातुं समर्थाः भविष्यन्ति।
4. सर्वानुक्रमणी-निघण्टु-निरुक्त-शिक्षा-प्रातिशाख्यग्रन्थान् अधिकृत्य अनुच्छेदान् लेखितुं शक्ष्यन्ति।
5. वाचस्पत्यम्, शब्दकल्पद्रुमः, हलायुधकोशः, अमरकोशः इत्यादीनां विशिष्टकोशग्रन्थानां वैशिष्ट्यं कथयितुं शक्ष्यन्ति।
6. आधुनिकसंस्कृतकोशकारानाम् योगदानस्य वर्णनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 3.क.2	संस्कृते शब्दकोशपरम्परा	04	0	0	04

पाठ्यक्रमस्य विवरणम् (Details of Course)

अन्वितिः १. संस्कृतशब्दकोशपरम्परायाः परिचयः। **श्रेयोऽङ्कः १**

- संस्कृतशब्दकोशानाम् उत्पत्तिः विकासश्च।
- प्रमुखशब्दकोशानां संक्षिप्तपरिचयः।
- शब्दकोशानां प्रकारः।

अन्वितिः २. संस्कृतकोशपरम्परा। **श्रेयोऽङ्कः १**

- प्रारम्भिकाः संस्कृतशब्दकोशाः।
- सर्वानुक्रमणी, निघण्टुः, निरुक्तम्।
- धातुपाठः, गणपाठः शिक्षाप्रातिशाख्ययोः वर्णमाला च।

अन्वितिः ३. शास्त्रीयसंस्कृतकोशाः। **श्रेयोऽङ्कः १**

- वाचस्पत्यम् - ग्रन्थसंघटना, टीकाः, अनुवादाः अङ्कीयकार्याणि च (Digitized works)
- शब्दकल्पद्रुमः - ग्रन्थसंघटना, टीकाः, अनुवादाः अङ्कीयकार्याणि च (Digitized works)
- हलायुधकोशः - ग्रन्थसंघटना, टीकाः, अनुवादाः अङ्कीयकार्याणि च (Digitized works)
- अमरकोशः - ग्रन्थसंघटना, टीकाः, अनुवादाः अङ्कीयकार्याणि च (Digitized works)
- मानखकोशः - ग्रन्थसंघटना, टीकाः, अनुवादाः अङ्कीयकार्याणि च (Digitized works)
- मेदिनीकोशः - ग्रन्थसंघटना, टीकाः, अनुवादाः अङ्कीयकार्याणि च (Digitized works)

अन्वितिः ४. आधुनिकसंस्कृतकोशकाराः **श्रेयोऽङ्कः १**

- मोनियर विलियम्स।
- वामन शिवराम आप्टे।
- आचार्यो विश्वबन्धुः।
- जिनेन्द्र-सिद्धान्तकोशः।
- न्यायकोशः।
- एम. ब्लूमफील्ड।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. होशियाङ्ग, प. जगन्नाथ शास्त्री (सम्पा०), (1968), *मेदिनीकोशः,* वाराणसी : चौखम्भा संस्कृत सीरीज ऑफिस।
2. Rice, B. L. (Comp.), & Balasubramanya, N. (Ed.). (1970). *Amarakosha.*
3. द्विवेदी, बालमुकुन्द, (1971), *संस्कृत कोश उद्भव और विकास,* इलाहाबाद : शहराराबाग।
4. नारंग, सत्यपाल, (1998), *संस्कृत कोशशास्त्र के विविध आयाम,* नई दिल्ली : राष्ट्रिय संस्कृत संस्थान।
5. शिवदत्ताभिध, महामहोपाध्याय पण्डित, (2003), *अमरकोशः,* नई दिल्ली : राष्ट्रिय संस्कृत संस्थान।
6. वाचस्पति, तारानाथ तर्क (सम्पा०), (2006), *वाचस्पत्यम्,* वाराणसी : चौखम्भा संस्कृत सीरीज ऑफिस।
7. Williams, Monier, & Ishwar Chandra (Ed. & Rev.). (2008). *Sanskrit English Dictionary.* Delhi: Parimal Publications.
8. देव बहादुर, राधाकान्त, (2018), *शब्दकल्पद्रुमः,* दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।

सहायकाः ग्रन्थाः (Additional Readings)

1. आप्टे, वामन शिवराम, (2012), संस्कृत-हिन्दी-शब्दकोश, नई दिल्ली : राष्ट्रिय संस्कृत संस्थान।
2. विश्वबन्धु, (2013), निघण्टु-निर्वचन-मीमांसा, दिल्ली : परिमल पब्लिकेशन्स।

काठिन्यस्तरः

100-199

श्रेयोऽङ्काः - 4

होराः - 60

गौणः पाठ्यक्रमः (Minor) 3.क.3: संस्कृताध्ययनाय शोधप्रविधिः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृताध्ययनसम्बद्धानां शोधपद्धतीनां मूलभूतावधारणानामाधारभूतसिद्धान्तानाञ्च परिचयः।
2. संस्कृतशिक्षार्थिभ्यः संस्कृतवाङ्मये मानवविज्ञानविषयेषु (Humanities) सामान्यतया प्रयुक्तानां शोधप्रविधीनां परिचयः।
3. संस्कृतक्षेत्रे प्राथमिकशोधपद्धत्याः आवश्यकतायाः महत्त्वस्य व्याप्तेश्च परिचयः।
4. शिक्षार्थिभ्यः आवश्यकशोधप्रक्रियाभिः (यथा - विषयचयनम्, परिकल्पनासंकल्पनम्, प्राथमिकसामग्रीसंकलनम्, ई-संसाधनानि, अनुसन्धान-साधनानि च) सह परिचयः।
5. समुचितसन्दर्भनिर्देशनाय स्पष्टबोधाय च सन्दर्भसम्बद्धानाम् अवधारणा-प्रक्रिया-पदानाञ्च परिचयः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः -

1. संस्कृताध्ययने उपयुक्तान् विविधशोधप्रविधीन् प्रस्तौतुं शक्ष्यन्ति।
2. शोधशीर्षकस्य निर्धारणे प्रयुक्तान् प्रविधीन् व्यक्तुं शक्ष्यन्ति।
3. शोधस्य विविधधाराणाम् अर्थे संस्कृतविद्वद्भिः प्रयुक्तान् विविधशोधप्रविधीन् सूचीकर्तुं शक्ष्यन्ति।
4. सर्वेक्षणपद्धतेः लक्षणानि तत्सम्बद्धसाधनैः सोपानैश्च सह व्याख्यातुं शक्ताः भविष्यन्ति।
5. शोधसन्दर्भस्य संकल्पनां तत्प्रक्रियां प्रकारान् संगणक-तन्त्रांशांश्च परिभाषितुं समर्थाः भविष्यन्ति।
6. देवनागरीपाठस्य IAST तथा TTRANS इति रूपान्तरणार्थं संगणकीयसाधनानां विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 3.क.3	संस्कृताध्ययनाय शोधप्रविधिः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. शोधस्य सैद्धान्तिकसंकल्पना। **श्रेयोऽङ्कः १**

- अनुसन्धानस्य परिचयः, उद्देश्यानि,प्रकाराश्च।
- अनुसन्धानकार्यरूपरेखा।
- अनुसन्धानपद्धतिः।
- शोधविषयनिर्धारणं लेखनपद्धतिश्च।
- सामग्रीसंकलनम् - प्राथमिकी गौणा च।
- ई-संसाधनानि, अनुसन्धानोपकरणानि च।

अन्विति: २. शोधसर्वेक्षणम्। **श्रेयोऽङ्क: १**

- सर्वेक्षणस्य संक्षिप्तपरिचयः।
- सर्वेक्षणस्य पद्धतयः।
- सर्वेक्षणस्य उपकरणानि प्रविधयश्च।
- सर्वेक्षणस्य सोपानानि।

अन्विति: ३. सन्दर्भः। **श्रेयोऽङ्क: १**

- सन्दर्भः क:?
- सन्दर्भस्य चरणानि कानि?
- सन्दर्भनिर्देशः कथं कर्तव्यः?
- उद्धरणं पाठ्योद्धरणञ्च।
- पाठ्योद्धरणस्य विविधप्रकारा: उदाहरणानि च।
- सन्दर्भनिर्देशाय विविधानि तन्त्रांश-उपकरणानि।
- सन्दर्भनिर्देशनस्य अवयवा: - पुस्तकम्, शब्दकोश:, सामयिकी पत्रिका, सम्मेलनानां लेखाः, वार्तापत्रम्, मासिकी पत्रिका, प्रतिवेदनं, शासकीयप्रकाशनं, शोधप्रबन्ध:, लघुशोधप्रबन्ध:, जालपृष्ठम्, अन्तर्जालस्रोत:, वैयक्तिकञ्चार: (लिखित:, वाचिक:, ईमेल-सन्देशश्च), व्याख्यानानि, चलचित्रम्, दृश्यसङ्ग्राहकयन्त्र: (डी.वी.डी.) इत्यादय:
- सन्दर्भनिर्देशस्य विविधशैलीनां परिचयः, संस्कृतभाषायां प्रयोगसन्दर्भे तासां शैलीनां विस्तृतपरिचयः।
- सन्दर्भसूचीनिर्माणस्य विधयः उदाहरणानि (Samples) च।

अन्विति: ४. लिप्यन्तरणम् **श्रेयोऽङ्क: १**

- लिप्यन्तरणयोजनाः।
- संस्कृतलिप्यन्तरणस्य अन्ताराष्ट्रियवर्णमाला (IAST)
- भारतीयभाषाणां लिप्यन्तरणम् (ITRANS)
- सुलभ-संगणनात्मकोपकरणानां माध्यमेन रूपान्तरणस्य परिचयः।
- देवनागरीलिप्याः पाठानां IAST-ITRANS लिप्यन्तरणम्।

निर्धारिता: ग्रन्था: (Essential/Recommended Readings/Texts)

1. शर्मा, डॉ. विनय मोहन, (1967), *शोधप्रविधि,* दिल्ली : नेशनल पब्लिशिंग हाउस।
2. Kothari, C. R. (2004). *Research methodology: Methods and techniques.* New Delhi: New Age International.
3. Yelikar, K. S. (2009). *Essentials of research methodology & dissertation writing (FOGSI).* New Delhi: Jaypee Brothers Medical Publishers.
4. नगेन्द्रः, डॉ., (2010), *अनुसन्धानस्य प्रविधि-प्रक्रिया,* नवदेहली : राष्ट्रिय-संस्कृत-संस्थानम्।
5. द्विवेदी, प्रो. प्रभुनाथ एवं चौबे, डॉ. सुरेशचन्द्र, (2017), *संस्कृत शोध-प्रविधि,* वाराणसी : शारदा संस्कृत संस्थान।

6. मिश्र, प्रो. अभिराज राजेन्द्र एवं मिश्र, डॉ. राजेशकुमारी, (2022), *शोधप्रविधि एवं पाण्डुलिपिविज्ञान,* इलाहाबाद : अक्षयवट प्रकाशन।
7. MakeUse Of. *5 PowerPoint tips to improve presentation skills overnight.* Retrieved from http://www.makeuseof.com/tag/5-powerpoint-tips-improve-presentation-skills-overnight/
8. Subagini. *Effective presentation skills.* Retrieved from https://www.slideshare.net/subagini/effective-presentation-skills-28512891
9. Free PowerPoint Templates. *18 tips to improve presentation skills.* Retrieved from http://www.free-power-point-templates.com/articles/18-tips-to-improve-presentation-skills/

सहायकाः ग्रन्थाः (Additional Readings)

1. http://shodhganga.inflibnet.ac.in/bitstream/10603/12164/11/11_chapter%204.pdf
2. http://shodhganga.inflibnet.ac.in/bitstream/10603/29975/12/12_chapter%205.pdf
3. http://www.baraha.com/
4. http://www.chicagomanualofstyle.org/home.html

चतुर्थवर्षः

(गौणपाठ्यक्रमाः)

काठिन्यस्तरः

100-199

श्रेयोऽङ्काः - 4

होराः - 60

गौणः पाठ्यक्रमः (Minor) 4.क.1: संस्कृतसाहित्ये राजनीतिचिन्तनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृतसाहित्ये वर्णितस्य राजनीतिचिन्तनस्य सङ्कल्पनायाः विकासस्य च परिचयः।
2. भारतीयराजनीतिचिन्तनस्य मूलस्रोतोरूपेण धर्मशास्त्रग्रन्थानां परिचयः।
3. संस्कृतराजनीतिचिन्तनस्य विविधायामानां तथा शास्त्रीयग्रन्थेषु प्रतिबिम्बितराजनीतिसंस्थानां च परिचयः।
4. संस्कृतराजनीतिचिन्तनपरम्परायाः स्थापने वैदिकसंहिता, महाभारतं, पुराणानि, कौटिल्यस्य अर्थशास्त्रं, नीतिशास्त्रं चेत्येतेषां ग्रन्थानां योगदानस्य मूल्याङ्कनम्।
5. स्मृतिसाहित्ये उपलभ्यमानराज्यस्वरूपस्य , तद्वर्गीकरणस्य च वर्णनम्।
6. प्राचीनभारतीयराजनीतेः प्रमुखसिद्धान्तानां यथा सप्ताङ्ग-मण्डल-षाड्गुण्य-चतुर्विधोपायादीनां सम्बद्धसङ्कल्पनानां च अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. संस्कृतसाहित्ये राजनीतिचिन्तनस्य सङ्कल्पनायाः परिचयं प्रदर्शयन्ति।
2. भारतीयराजनीतिचिन्तने वेद-महाभारत-पुराण-अर्थशास्त्र-नीतिशास्त्रादीनां प्रमुखग्रन्थानां योगदानं सूचयिष्यन्ति।
3. प्राचीनभारतीयराजनीतेः प्रमुखसिद्धान्तान् वर्णयितुं सिद्धाः भविष्यन्ति।
4. प्राचीनभारतीयराजनीतिचिन्तनस्य उद्भवः विकासश्च परिचयं दातुं शक्ष्यन्ति।
5. राज्यस्य स्वरूपं प्रकाराश्च वर्णयितुं शक्ष्यन्ति।
6. प्राचीनभारतीयराजनीतेः प्रमुखसिद्धान्तान् वर्णयितुं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 4.क.1	संस्कृतसाहित्ये राजनीतिचिन्तनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्राचीनभारतीयराजनीतिचिन्तनस्य नामानि स्रोतांसि च। **श्रेयोऽङ्कः १**

- प्राचीनभारतीयराजनीतिशास्त्राणां विविधनामानि –
  - दण्डनीतिः।
  - अर्थशास्त्रम्।
  - धर्मशास्त्रम्।

- राजशास्त्रम्।
- नीतिशास्त्रम्।

- प्राचीनभारतीयराजनीतिचिन्तनस्य स्रोतांसि –
  - वैदिकसाहित्यम्।
  - रामायणम्।
  - महाभारतम्।
  - पुराणम्।
  - धर्मशास्त्रम्।
  - नीतिशास्त्रम्।
- प्रमुखभारतीयराजनीतिचिन्तकाः –
  - मनुः।
  - शुक्राचार्यः।
  - कौटिल्यः।
  - कामन्दकः।
  - सोमदेवसूरिः।

अन्वितिः २. राज्यस्य स्वरूपं प्रकाराश्च। **श्रेयोऽङ्कः १**

- राज्यस्य स्वरूपम् (अर्थशास्त्रम् ६.१) (मनुस्मृतिः ९.२९४)
- राज्यस्य प्रकाराः - राज्यम्, स्वराज्यम्, भोज्यम्, वैराज्यम्, महाराज्यम्, साम्राज्यम् (ऐतरेयब्राह्मणम्, ८.३.१३-१४; ८.४.१५-१६)

अन्वितिः ३. प्राचीनभारतीयराजनीतिचिन्तनस्य उद्भवः विकासश्च। **श्रेयोऽङ्कः १**

- वैदिकसाहित्यम् –
  - वैदिककाले जनैः 'विशः' राज्ञः निर्वाचनम् (ऋग्वेदः १०.१७३; १०.१७४) (अथर्ववेदः३.४.२; ६.८७.१-२)
  - संसदीयसंस्थाः - 'सभा', 'समितिः', 'विदथः' च।
- वैदिकोत्तरसाहित्यम् –
  - कौटिल्यस्य कल्याणकारीराज्यस्य सङ्कल्पना (अर्थशास्त्रम्, १.१३)
  - राज्ञः आवश्यकगुणाः (अर्थशास्त्रम् ६.१.१६-१८)
  - राजधर्माः (राज्ञः कर्तव्यानि) राज्यस्य च कर्तव्यानि (महाभारतस्य शान्तिपर्वः १२०.१-१५) (मनुस्मृतिः ७.१-१५) (शुक्रनीतिः १.१-१५)
  - घटकतत्त्वानि (सोमदेवस्य नीतिवाक्यामृतम् ९.१.१८, १९.१.१०)

अन्वितिः ४. प्राचीनभारतीयराजनीतेः प्रमुखसिद्धान्ताः। **श्रेयोऽङ्कः १**

- सप्ताङ्गसिद्धान्तः - स्वामी, अमात्यः, जनपदः, पुरः, कोशः, दण्डः, मित्रञ्च।

- अन्तर्राज्यसम्बन्धविषयकः मण्डलसिद्धान्तः।
- षाड्गुण्यम् - सन्धिः, विग्रहः, यानम्, आसनं, संश्रयः, द्वैधीभावश्च।
- चतुर्विधोपायाः – साम-दाम-दण्ड-भेदाः।
- राज्यशक्तेः त्रयः प्रकाराः - प्रभुशक्तिः, मन्त्रशक्तिः, उत्साहशक्तिश्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Griffith, R. T. H. (Trans.), (1896–1897/1968), *Atharvaveda Samhita* (2 Vols.), Reprint, Bangalore.
2. Wilson, H. H. (Trans.), (1946), *Ṛgveda Saṃhitā* (6 Vols.), Bangalore, Bangalore: Printing & Publishing Co.
3. Shastri, H. P., (1952–1959), *Mahabharata* (7 Vols.), London:
4. Belvalkar, S. K., (1954), *Mahabharata: Śānti Parvam*, Poona, Bhandarkar Oriental Research Institute.
5. Gharpure, J. R., (1956), *Teaching of Dharmashastra*, Lucknow: Lucknow University.
6. Ghosal, U. N., (1959), *A History of Bharatiya Political Ideas*, Bombay.
7. Kangale, R. P. (Ed.), (1965), *Arthashastra of Kautilya*, Delhi: Motilal Banarsidass.
8. Jayaswal, K. P., (1967), *Hindu Polity*, Bangalore.
9. Altekar, A. S., (1973), *State and Government in Ancient India*, Delhi: Motilal Banarsidass.
10. दीक्षित, प्रेमकुमारी, (1977), *प्राचीन भारत में अन्तरराष्ट्रीय सम्बन्ध,* लखनऊ : उत्तर प्रदेश हिन्दी ग्रन्थ अकादमी।
11. मिश्र, ब्रह्मशंकर, (1968), *शुक्रनीति* (हिन्दी अनुवाद), वाराणसी : चौखम्भा संस्कृत सीरीज।
12. Olivelle, P. (Ed. & Trans.), (2006), *Manu's Code of Law: A Critical Edition and Translation of the Manava-Dharamashastra*, New Delhi: Oxford University Press.
13. नाटाणी, प्रकाश नारायण, (2002), *प्राचीन भारत में राजनीतिक विचारक,* जयपुर : पोइन्टर पब्लिशर्स।
14. तिवारी, शशि, (2013), *संस्कृत साहित्य में राष्ट्रवाद एवं भारतीय राजशास्त्र,* दिल्ली : विद्यानिधि प्रकाशन।
15. भंडारकर, डी. आर., *Some Aspects of Ancient Bharatiya Hindu Polity*, Banaras Hindu University.
16. गैरोला, वाचस्पति, *कौटिल्य अर्थशास्त्र,* वाराणसी।
17. गणपति शास्त्री, टी. (सम्पा.), *कौटिल्य अर्थशास्त्र,* संस्कृत टीका सहित, त्रिवेन्द्रम्।
18. शास्त्री, उदयवीर (अनुवा.), *कौटिल्यीय अर्थशास्त्र,* दिल्ली : मेहरचन्द लक्ष्मनदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. Sinha, K. N. (1938). *Sovereignty in Ancient Bharatiya Polity.* London.
2. Law, N. S. (1960). *Aspect of Ancient Bharatiya Polity.* Calcutta.
3. Saletore, B. A. (1963). *Ancient Bharatiya Political Thought and Institutions.* Bombay.
4. Verma, V. P. (1954). *Studies in Hindu Political Thought and its Metaphysical Foundations.* Delhi.
5. Prasad, B. (1968). *Theory of Government in Ancient India.* Allahabad.
6. Maheshwari, S. R. *Local Government in India.* New Delhi: Orient Longman.
7. Sharma, R. S. (1996). *Aspects of Political Ideas and Institutions in Ancient India.* Delhi.

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

गौणः पाठ्यक्रमः (Minor) 4.क.2: नैरन्तर्यविकासः (Sustainable Development) भारतीयज्ञानपरम्परा च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयज्ञानपरम्परायाः संरचनायां नैरन्तर्यविकासस्य सङ्कल्पनायाः परिचयः।
2. पारम्परिकभारतीयज्ञानप्रणालीषु निहितानां दार्शनिकानां पारिस्थितिकानां नैतिकानां च आयामानाम् अन्वेषणम्।
3. आधुनिकनैरन्तर्यतापद्धतिभिः वैश्विकपर्यावरणीयचिन्ताभिश्च (sustainability practices and global environmental concerns) सह भारतीयज्ञानपरम्परायाः एकीकरणस्य परीक्षणम्।
4. भारतीयपरम्परासु ग्रथितानां नैरन्तर्याभ्यासानां व्यावहारिककार्यान्वयनार्थं समग्रबोधस्य आलोचनात्मकचिन्तनस्य च पोषणम्।
5. नैरन्तर्यसम्बद्धं पर्यावरणसामञ्जस्यसम्बद्धं च भारतीयदृष्टिकोणं सूचयतां दार्शनिकाधाराणां सविस्तरं वर्णनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयज्ञानपरम्परायाः संरचनायां नैरन्तर्यविकासस्य सङ्कल्पनायाः परिचयं दातुं समर्थाः भविष्यन्ति।
2. पारम्परिकभारतीयनैरन्तर्यतासङ्कल्पनायाः विविधान् आयामान् स्पष्टकर्तुं शक्ष्यन्ति।
3. भारतीयनैरन्तर्यतायाः दार्शनिकाधारास्य प्रमुखसिद्धान्तान् विश्लेषयितुं शक्ष्यन्ति।
4. प्राचीनग्रन्थेषु प्राचीनपद्धतिषु च पारिस्थितिकी नैरन्तर्यता परिचयं वक्तुं शक्ष्यन्ति।
5. नैरन्तर्यस्य प्राप्तौ प्रकृतिपूजा, जलसंरक्षणम्, अहिंसा, अपरिग्रहः, पशुकल्याणादीनां प्रभावं ज्ञास्यन्ति।
6. नैरन्तर्यतासुनिश्चिततायां प्रकृतिसंरक्षणान्दोलनानां भूमिकां दर्शयितुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
गौणः पाठ्यक्रमः (Minor) 4.क.2	नैरन्तर्यविकासः भारतीयज्ञानपरम्परा च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. नैरन्तर्यविकासस्य अवबोधनम्। **श्रेयोऽङ्कः १**

- नैरन्तर्यविकासस्य परिभाषा, उद्भवः, विकासश्च।
- प्रमुखसङ्कल्पनाः - पर्यावरणम्, अर्थव्यवस्था, समता, नैतिकता।
- संयुक्तराष्ट्रसंघस्य नैरन्तर्यविकासलक्ष्यानि (UN - SDGs)

- नैरन्तर्यतायाः प्रत्याह्वानानि - जलवायुपरिवर्तनम्, असमानता, संसाधनह्रासः।

अन्विति: २. भारतीयज्ञानपरम्परायां दार्शनिकाधाराः। **श्रेयोऽङ्कः १**

- ऋतस्य, धर्मस्य, यज्ञस्य लोकसङ्ग्रहस्य च सङ्कल्पनाः।
- वेदेषु, उपनिषत्सु, स्मृतिग्रन्थेषु च पारिस्थितिकनैतिकता।
- अमानवकेन्द्रितविश्वदृष्टयः (Non-anthropocentric worldviews) - सर्वं खल्विदं ब्रह्म, वसुधैव कुटुम्बकम्।
- जैनधर्मे बौद्धधर्मे च अहिंसा परस्परसम्बद्धता च।

अन्विति: ३. प्राचीनग्रन्थेषु प्राचीनपद्धतिषु च पारिस्थितिकी नैरन्तर्यता च। **श्रेयोऽङ्कः १**

- इतिहास-पुराणसाहित्ये पर्यावरणीयचेतना।
- पारम्परिकजलप्रबन्धनं, पारम्परिककृषिः, पारम्परिकवास्तुकला च - सोपानकूपाः, वृक्षायुर्वेदः, वास्तु।
- वनसंरक्षणे पशुकल्याणे च स्वदेशीपद्धतयः।
- वैयक्तिकाध्ययनानि – बिश्नोई आन्दोलनं, चिप्को आन्दोलनं, पवित्रवन- आन्दोलनम्।

अन्विति: ४. भारतीयज्ञानपरम्परायाः आधुनिकनैरन्तर्यतादर्शाणाञ्च संश्लेषणम्। **श्रेयोऽङ्कः १**

- गान्धीविचाराः नैरन्तर्यविकासश्च।
- एकात्ममानववादः (दीनदयालोपाध्यायस्य) समग्रविकासश्च।
- राष्ट्रियशिक्षानीतिः (NEP 2020) - नैरन्तर्यतायै भारतीयज्ञानपरम्परायाः प्रोत्साहनं च।
- भारतीयविद्याद्वारा शिक्षायाः, अर्थशास्त्रस्य, शासनस्य च पुनःकल्पनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Radhakrishnan, S. (1923). *Indian Philosophy (Vol. I & II).* London: George Allen & Unwin LTD., Ruskin House; New York.
2. Gandhi, M. K. (1933). *Hind Swaraj.* Ahmedabad: Navajivan Publishing House.
3. Chandra, L. (1990). *Cultural Horizons of India.* Delhi: Aditya Prakashan.
4. Kapoor, K. (2005). *Indian Knowledge System.* New Delhi: D. K. Printworld (P) Ltd.
5. Balasubramanian, D., et al. (2002). *Traditional Ecological Knowledge for Managing Biosphere Reserves in South and Central Asia.*
6. Chattopadhyaya, D. P. (Ed.). (2002). *History of Science, Philosophy and Culture in Indian Civilization (Vols. on Nature and Culture).* India: Centre for Studies in Civilization.
7. Shiva, V. (2009). *Staying Alive: Women, Ecology and Development.* Women Unlimited.
8. Upadhyay, D. (2014). *Integral Humanism.* Delhi: Hindi Sahitya Sadan.
9. MHRD, Govt. of India. (2020). *NEP 2020.*
10. Debroy, B. (Ed.). (2019). *The Bhagavad Gita for the Modern World.* UK: Penguin Classics.

सहायकाः ग्रन्थाः (Additional Readings)

1. उपध्यायः बलदेवः, (2010), *वैदिक साहित्य और संस्कृति*, वाराणसी : शारदा संस्थान।
2. उपध्यायः बलदेवः, (2012)संस्कृत वाङ्मय का बृहद् इतिहास, प्रथम भाग (वेद), लखनऊ: उत्तर प्रदेश संस्कृत संस्थान।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

गौणः पाठ्यक्रमः (Minor) 4.क.3: संस्कृतपरम्परायां ध्वनिविज्ञानम् (Phonetics)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृतपरम्परायां ध्वनिविज्ञानस्य मूलभूतसङ्कल्पनानां सिद्धान्तानां च परिचयः।
2. वाक्-उत्पादनयन्त्राणां परिचयप्रदानम्। वाग्ध्वनीनां सम्यक् प्रत्यक्षीकरणे, अभिज्ञाने, प्रतिलेखने च छात्राणां प्रशिक्षणम्।
3. संस्कृतध्वनिविज्ञानस्य मूलस्रोतोरूपेण विद्यमानानां प्राथमिकग्रन्थानां परिचयः।
4. संस्कृतध्वनिविज्ञानस्य विकासे शिक्षाग्रन्थानां तेषां महत्त्वपूर्णयोगदानस्य च परिचयः।
5. संस्कृतध्वनिवैज्ञानिकसिद्धान्तानां निरूपणे व्यवस्थीकरणे च पाणिनीयशिक्षायाः मुख्यभूमिकायाः परिचयः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. संस्कृतध्वनिविज्ञानस्य स्वरूपं महत्त्वं च वर्णयितुं शक्ष्यन्ति।
2. ध्वनिविज्ञानस्य परिभाषां व्याख्यातुं शक्ताः भविष्यन्ति।
3. भारतीयध्वनिवैज्ञानिकपरम्पराणाम् उद्भवं विकासं च प्रस्तोष्यन्ति।
4. संस्कृतध्वनिप्रणालीनां वागुत्पादनयन्त्राणां ध्वनिविज्ञानस्य सिद्धान्तानां च विवरणानि प्रदास्यन्ति।
5. संस्कृतध्वनिविज्ञानस्य सङ्कलने पाणिनीयशिक्षायाः वैशिष्ट्यं भूमिकां च प्रस्तोष्यन्ति।
6. भारतीयध्वनिविज्ञानस्य स्वरूपं वर्णयन्तः संस्कृतध्वनिविज्ञानस्य प्रमुखग्रन्थान् सूचयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.9	संस्कृतगद्यसाहित्यस्य परिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. शुकनासोपदेशः। **श्रेयोऽङ्कः १**

- शुकनासोपदेशस्य परिचयः।
- शुकनासोपदेशवर्णितः समाजः।
- शुकनासोपदेशवर्णितं राजनैतिकचिन्तनम्।

अन्वितिः २. शिवराजविजयं (निःश्वासः - १) **श्रेयोऽङ्कः १**

- शिवराजविजयस्य काव्योत्कृष्टता कथानकं, क्रियाकालः च। (Poetic excellence, plot, Timing of Action)

अन्वितिः ३. संस्कृतगद्यसाहित्येतिहासः। **श्रेयोऽङ्कः १**

- महत्त्वपूर्णगद्यकाव्यानाम् उत्पत्तिः विकासश्च (सुबन्धुः बाणः दण्डी अम्बिकादत्तव्यासादीनां विशेषसन्दर्भे)

अन्वितिः ४. संस्कृतगद्यसाहित्यस्य सर्वेक्षणम्। **श्रेयोऽङ्कः १**

- संस्कृतगद्यसाहित्यस्य सर्वेक्षणम् - अधोदत्तगद्यकाव्यानां विशेषसन्दर्भे।
- पंचतन्त्रं हितोपदेशः वेतालपञ्चविंशतिका सिंहासनद्वात्रिंशिका पुरुषपरिक्षा च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. *कादम्बरी*, देहली : मेहरचन्दलक्ष्मणदासः।
2. अम्बिकादत्तव्यासरचितः, *शिवराजविजयम्* (व्याख्या – रमाशंकरश्रीः), वाराणसी : चौखम्भा सुरभारती प्रकाशनम्।
3. Keith, A. B. *History of Sanskrit Literature* (also Hindi translation). Delhi : Motilal Banarsidass (MLBD).

सहायकाः ग्रन्थाः (Additional Readings)

1. पाण्डेय, रामनाथ, (1990), *संस्कृत गद्य के प्रमुख रचनाकार*, वाराणसी : सरस्वती भवन ग्रंथमाला।
2. झा, गोविन्द, (1998), *संस्कृत गद्य साहित्य में नीतिकाव्य परंपरा*, पटना : विद्याभवन प्रकाशन।
3. भट्ट, जी. एन., (2001), *संस्कृत गद्य साहित्य का इतिहास*, वाराणसी : चौखम्बा संस्कृत भवन।
4. शास्त्री, सत्यव्रत, (2008), *संस्कृत साहित्य का संक्षिप्त इतिहास*, दिल्ली : मोतीलाल बनारसीदास।
5. मिश्र, प्रभाकर, (2015), *गद्यकाव्यम्, एक अध्ययन*, प्रयागराज : भारतीय साहित्य संस्थान।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.10: अलङ्कारशास्त्रस्य परिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अलङ्कारशास्त्रस्य सामान्यपरिचयप्रदानम्।
2. अलङ्कारशास्त्रेण प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. अलङ्कारशास्त्रे विद्यमानानां प्रमुखग्रन्थानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विविध-अलङ्कारशास्त्राणां परिचयं वक्ष्यन्ति।
2. अलङ्कारशास्त्रे विद्यमानवैशिष्ट्यस्य गुणानाञ्च परिचयस्य प्रदाने समर्थाः भविष्यन्ति।
3. प्राचीनसंस्कृतवाङ्मये अलङ्कारशास्त्रभेदान् च निरूपयिष्यन्ति।
4. ध्वनि-रस-औचित्य-वक्रोक्ति-रीति-इत्यादि-अलङ्काराणां प्रतिपादने समर्थाः भविष्यन्ति।
5. प्रमुख-अलङ्काररचनायाः मौलिकतां वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.10	अलङ्कारशास्त्रस्य परिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. अलंकारशास्त्रस्य विभिन्नाः सिद्धान्ताः। **श्रेयोऽङ्कः १**

- ध्वनिसिद्धान्तस्य परिचयः।
- रससिद्धान्तस्य परिचयः।

अन्वितिः २. मम्मटरचितकाव्यप्रकाशः। **श्रेयोऽङ्कः १**

- लेखकस्य परिचयः।
- ग्रन्थस्य परिचयः।
- दशोल्लासानां विशिष्टः परिचयः।

अन्वितिः ३. काव्यप्रकाशः प्रथमोल्लासः। **श्रेयोऽङ्कः १**

- कविसृष्टिः - ब्रह्मसृष्टिः।
- काव्यप्रयोजनम्।

- काव्यहेतुः।
- काव्यभेदाः।

अन्वितिः ४. काव्यप्रकाशः द्वितीयोल्लासः। **श्रेयोऽङ्कः १**

- संकेतवादः।
- षड्विधलक्षणा।
- लक्षणामूलव्यञ्जना।
- अभिधामूलव्यञ्जना।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मम्मटः, *काव्यप्रकाशः*, धारवाडम् : प्रसरंग कर्नाटक विश्वविद्यालयः।
2. मम्मटः, *काव्यप्रकाशः*, वाराणसी : चौखम्भा संस्कृतमालाकार्यालयः।
3. डॉ. सत्यव्रत सिंह, *काव्यप्रकाशः*, देहली : चौखम्भा संस्कृत प्रतिष्ठानम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. आनन्दवर्धनः, (1990), *ध्वन्यालोकः* (सम्पा. पं. रमाशंकर त्रिपाठी), वाराणसी : चौखम्बा विद्याभवन।
2. भरतमुनिः, (1996), *नाट्यशास्त्रम्* (एड. मण्मथनाथ द्विवेदी), वाराणसी : चौखम्बा संस्कृत सीरीज कार्यालय।

द्वितीयवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
200-299

तृतीयसत्रार्द्धः (Semester - 3)

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.1: काव्यलक्षणानुबन्धप्रयोजनानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साहित्यशास्त्रे काव्यलक्षणपरिज्ञानम्।
2. साहित्य शास्त्रे अनुबन्धानां परिज्ञानम्।
3. भारतीयज्ञानपरम्परायां काव्यशास्त्रे च काव्यप्रयोजनविषये ज्ञानार्जनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साहित्यशास्त्रे प्रोक्तानि काव्यलक्षणानि सूक्ष्मतया प्रतिपादयिष्यन्ति।
2. भारतीयज्ञानपरम्परायां काव्यशास्त्रे अलङ्कारप्रयोजनविषये वर्णयिष्यन्ति।
3. काव्यशास्त्रेऽनुबन्धचतुष्टयविषये वक्तुं शक्ष्यन्ति।
4. आलङ्कारिकनये मम्मटाचार्यानुसारेण विश्वनाथानुसारेण पण्डितराजजगन्नाथानुसारेण च काव्यप्रयोजनं निरूपयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	काव्यलक्षणानुबन्ध-प्रयोजनानि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. आलङ्कारिकनये काव्यस्वरूपम्। **श्रेयोऽङ्कः १**

- भामहप्रभृति-आलङ्कारिकाणां मतानुसारेण काव्यलक्षणम्।
- अनुबन्धचतुष्टयम्।
- काव्यप्रयोजनम्।
- प्रमुखाणाम् आलङ्कारिकानां मतानुसारेण काव्यप्रयोजनम्।

अन्वितिः २. मम्मटाचार्यानुसारेण काव्यप्रयोजनम्। **श्रेयोऽङ्कः १**

- काव्यलक्षणम्।
- काव्यप्रयोजनम्।
- यशः अर्थः व्यवहारबोधश्च।
- अमङ्गलनाशः।

- सद्यः परनिर्वृतिः कान्तासम्मितोपदेशाश्च।

अन्वितिः ३. विश्वनाथानुसारेण काव्यप्रयोजनम्। **श्रेयोऽङ्कः १**

- काव्यफलानि।
- अनुबन्धचतुष्टयम्।
- चतुर्वर्गफलप्राप्तिः।
- धर्मार्थकाममोक्षाणां प्राप्तिः।

अन्वितिः ४. पण्डितराजजगन्नाथानुसारेण काव्यप्रयोजनम्। **श्रेयोऽङ्कः १**

- काव्यलक्षणम्।
- काव्यफलानि।
- अनुबन्धचतुष्टयम्।
- कीर्तिः परमाह्लाद-गुरुप्रसादः राजप्रसाद-देवताप्रसादश्च फलम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मम्मटः, (2008), *काव्यप्रकाशः* (भट्टवामनाचार्यः, झलकीकरः), दिल्ली : परिमल पब्लिकेशन।
2. मम्मटः, (2008), *काव्यप्रकाशः* (आचार्य विश्वेश्वरः), वाराणसी : ज्ञानमङ्गल लिमिटेड।
3. पण्डितराजः जगन्नाथः, (2010), *रसगङ्गाधरः* (सम्पा. पण्डितमदनमोहनझा), वाराणसी : चौखम्बा विद्याभवन।
4. विश्वनाथः, (2019), *साहित्यदर्पणः* (आचार्य शेषराजशर्मा रेग्मी), वाराणसी : चौखम्बा कृष्णदास अकादमी।

सहायकाः ग्रन्थाः (Additional Readings)

1. डे, सुशीलकुमार, & शर्मा, श्रीमायाराम, संस्कृतकाव्यशास्त्र का इतिहास, पटना : बिहार हिन्दी ग्रन्थ अकादमी।
2. मिश्र, जयमन्त, काव्यात्ममीमांसा, वाराणसी : चौखम्बा विद्या भारती।
3. बलदेव उपाध्याय, संस्कृतवाङ्मय का बृहद् इतिहास (काव्यशास्त्रखण्ड), लखनऊ : उत्तरप्रदेशसंस्कृतसंस्थान।

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: शुकनासोपदेशः - राजनैतिकतत्त्वानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. बाणभट्टस्य काव्यकौशलज्ञानप्रदानम्।
2. शुकनासोपदेशदिशा राजनैतिकतत्त्वानाम् अवबोधनम्।
3. यौवनोचितोपदेशप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. गद्यसाहित्यस्य वैशिष्ट्यं ज्ञास्यन्ति।
2. शुकनासोपदेशवर्णितराज्यव्यवस्थां वर्णयिष्यन्ति।
3. शुकनासोपदेशवर्णितं राजनयं (युद्धनीतिः, सन्धिः इत्यादयः) निरूपयिष्यन्ति।
4. शुकनासोपदेशवर्णितराजपरिवारविषयान् वक्ष्यन्ति।
5. शुकनासोपदेशवर्णितसामाजिकसम्बन्धान् वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	शुकनासोपदेशः - राजनैतिकतत्त्वानि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. राज्यव्यवस्था। **श्रेयोऽङ्कः १**

- राजशासनशैली।
- प्रशासनिकसंरचना।
- न्यायव्यवस्था।
- अर्थनीतिः।

अन्वितिः २. राजनयः। **श्रेयोऽङ्कः १**

- मित्रराष्ट्राणां सम्बन्धाः।
- शत्रुराष्ट्रनीतिः।

- सन्धिः।
- युद्धनीतिः।

अन्वितिः ३. राजपरिवारः। **श्रेयोऽङ्कः १**

- युवराजस्य शिक्षणम्।
- राजकुमाराणां कर्तव्यानि।
- राज्ञ्याः भूमिका।
- राजवंशस्य परम्परा।

अन्वितिः ४. सामाजिकसम्बन्धाः। **श्रेयोऽङ्कः १**

- वर्णव्यवस्था।
- जातीयसम्बन्धाः।
- धार्मिकपरम्पराः।
- सांस्कृतिकम् आदानप्रदानम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. बाणभट्टः, (2019), *कादम्बरी (शुकनासोपदेशः)*, वाराणसी : चौखम्बा विद्याभवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. कीथ, ए. बी., & शास्त्री, मंगलदेव, (1967), *संस्कृत साहित्य का इतिहास*, दिल्ली : मोतीलाल बनारसीदास।
2. द्विवेदी, कपिलदेव, (2007), *संस्कृत साहित्य का समीक्षात्मक इतिहास*, वाराणसी : विश्वविद्यालय प्रकाशन।

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: संस्कृतनाटकानि - चितनाटकानाम् अध्ययनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृतसाहित्ये प्रसिद्धानां नाटकानां ज्ञानप्रदानम्।
2. नाटकपात्रमाध्यमेन रामायणे नारीशक्तेः ज्ञानप्रदानम्।
3. प्राचीननाटकानामध्ययनम्।
4. लौकिकसाहित्ये नाट्यपात्राणां ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. नाटकसाहित्यस्य इतिहासं सिद्धान्तान् परिचयञ्च वर्णयिष्यन्ति।
2. स्वप्नवासवदत्तवर्णितविषयान् निरूपयिष्यन्ति।
3. अभिज्ञानशाकुन्तलवर्णितविषयान् निरूपयिष्यन्ति।
4. मुद्राराक्षसवर्णितविषयान् निरूपयिष्यन्ति।
5. संस्कृतनाट्यपरम्परायाः सौन्दर्यस्य समृद्धेश्च विषये अवगमयितुं प्रभविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	संस्कृतनाटकानि - चितनाटकानाम् अध्ययनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. संस्कृतनाटकस्य इतिहासः (उत्पत्तिः विकासश्च) **श्रेयोऽङ्कः १**

- नाटकस्य स्वरूपम् उत्पत्तिः प्रयोजनञ्चेति।
- नाट्यसिद्धान्तानां परिचयः।
- केषाञ्चन महत्त्वपूर्ण-नाटककाराणां परिचयः (भास-कालिदास-शूद्रकाणां विशेषसन्दर्भे)

अन्वितिः २. स्वप्नवासवदत्तम् - प्रथमसर्गः। **श्रेयोऽङ्कः १**

- भासस्य स्वप्नवासवदत्तस्य कथायाः परिचयः।
- प्रथमसर्गस्य कथा व्याख्या च।
- भासशैल्याः वैशिष्ट्यस्य अध्ययनम्।
- प्रथमसर्गस्य पात्राणां परिचयः चरित्रचित्रणञ्चेति।
- स्वप्नवासवदत्तानुसारं समाजे विवाहस्य मानदण्डः।

अन्वितिः ३. अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य अध्ययनम्। **श्रेयोऽङ्कः १**

- नाटकस्योत्कृष्टता, कथायाः परिचयः।
- काव्येषु नाटकं रम्यं.....इति श्लोकस्य अन्वर्थता/सङ्गति चेति।
- चतुर्थाङ्कस्य कथा व्याख्या च।
- चतुर्थाङ्के वर्णितानामुपमालङ्काराणां ध्वनेश्च परिचयः।
- चतुर्थाङ्के वर्णितस्य शकुन्तलायाः प्रकृतिप्रेम्णः वर्णनम्।

अन्विति: ४. मुद्राराक्षसम् - प्रथमसर्गः। **श्रेयोऽङ्कः १**

- मुद्राराक्षसस्य तल्लेखकस्य परिचयः।
- अस्य नाटकस्य रचनायाः प्रयोजनञ्चेति।
- प्रथमसर्गस्य कथा व्याख्या च।
- काव्यस्योत्कृष्टतायाः वर्णनं, कथाविश्लेषणञ्चेति।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पन्त, सुबोधचन्द्र, *अभिज्ञानशाकुन्तलम्*, दिल्ली : मोतीलाल बनारसीदास।
2. शास्त्री, सुरेन्द्रदेव, *अभिज्ञानशाकुन्तलम्*, इलाहाबाद : रामनारायण बेनीप्रसाद।
3. आचार्य, नारायणराम, *अभिज्ञानशाकुन्तलम्*, नीमच : निर्णयसागर प्रेस।
4. विद्यालंकार, जयपाल, *स्वप्नवासवदत्तम्*, दिल्ली : मोतीलाल बनारसीदास।
5. मिश्र, जगदीशचन्द्र, *मुद्राराक्षसम्*, वाराणसी : चौखम्बा विद्याभवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. दीपककुमार, *भारतीय संस्कृति*, वाराणसी : चौखम्बा संस्कृत संस्थानम्।

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.4: विशिष्टालङ्काराणाम् अध्ययनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृतकाव्यशास्त्रे प्रसिद्धानां सिद्धान्तानां ज्ञानप्रदानम्।
2. विभिन्नानां सिद्धान्तानाम् ऐतिहासिकपरम्परायाः अध्ययनम्।
3. रस-ध्वनि-अलंकार-रीति-वक्रोक्ति-औचित्य-आदिषु विषयेषु सामान्यावबोधनम्।
4. भारतीयशास्त्रपरम्परायाः संरक्षणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साहित्यशास्त्रे प्रस्थानानां सामाजिकोपयोगित्वं प्रतिपादयितुं शक्ष्यन्ति।
2. यमक-उपमाद्यलङ्काराणां सामान्यपरिचयं वक्ष्यन्ति।
3. चन्द्रालोकवर्णित-अलङ्कारान् प्रतिपादयिष्यन्ति।
4. रस-ध्वनि-अलंकार-रीति-वक्रोक्ति-औचित्यादिसिद्धान्तान् निरूपयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.4	विशिष्टालङ्काराणाम् अध्ययनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. साहित्यशास्त्रे प्रस्थानानि। **श्रेयोऽङ्कः १**

- अलङ्कारप्रस्थानस्य परिचयः।
- रीतिप्रस्थानस्य परिचयः।

अन्वितिः २. लक्षणग्रन्थेभ्यः यमक-उपमाद्यलङ्काराणां सामान्यपरिचयः। **श्रेयोऽङ्कः १**

- अलङ्कारसर्वस्वं, काव्यालङ्कारसूत्रवृत्तिः, काव्यमीमांसा, कुवलयानन्दः इति लक्षणग्रन्थानां विशेषसन्दर्भे।

अन्वितिः ३. चन्द्रालोकः (पञ्चमः मयूखः) **श्रेयोऽङ्कः १**

- अलङ्कारलक्षणम्।
- शब्दालङ्काराः।

- उपमा-अनन्वय-उपमेयोपमा-रूपक-परिणामालङ्काराः।

अन्विति: ४. चन्द्रालोकः (पञ्चमः मयूखः) **श्रेयोऽङ्कः १**

- उल्लेख-अपह्नुति-उत्प्रेक्षा-अर्थापत्ति-अनुमानालङ्काराः।
- काव्यलिङ्ग-परिकर-तुल्ययोगिता-दीपक-प्रतिवस्तूमालङ्काराः।
- दृष्टान्त-निदर्शना-व्यतिरेक-सहोक्ति-विनोक्ति-समासोक्त्यलङ्काराः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जयदेवः, (1929), *चन्द्रालोकः* (पीयूषवर्ष, मिश्र, पद्मनाभ, भट्टाचार्य, प्रद्योतन), बनारस : चोखम्बा संस्कृत सीरिज आफ़िस, विद्याविलास प्रेस।
2. विश्वनाथकविः, (1933), *चन्द्रालोकः* (वामनशास्त्री बापत, सम्पा०), पुणे : आनंदाश्रमसंस्थानम्।
3. सिंहः, मुरलीमनोहरप्रसाद, (1964), *अलंकारमीमांसा*, पटना : भारती भवन।
4. हीरा, डा. राजवंश सहाय, (1967), *भारतीय काव्यशास्त्र के प्रतिनिधि सिद्धान्त*, वाराणसी : चौखम्बा विद्याभवन।
5. उपाध्याय, आचार्य बलदेव, (2001), *संस्कृत साहित्य का इतिहास*, वाराणसी : शारदा निकेतन।
6. मिश्रः, जगदीशचन्द्रः, *अलङ्कारशास्त्रस्य इतिहासः*।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीजयमन्तमिश्र, डा., (2005), काव्यात्ममीमांसा, वाराणसी : चौखम्बा विद्याभवन।
2. काणे, पी. वी., & शास्त्री, डा. ईश्वर चन्द्र, (2007), संस्कृतकाव्यशास्त्र का इतिहास, दिल्ली : मोतीलाल बनारसीदास।

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.5: प्राच्यपाश्चात्यसाहित्यस्य तुलनात्मकमध्ययनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साहित्यस्य प्राच्यपाश्चात्यस्वरूपस्य अवगमनम्।
2. विभिन्नानां प्राच्यपाश्चात्यसिद्धान्तानाम् अध्ययनम्।
3. विश्वदृष्ट्या, सान्दर्भिकबुद्ध्या च युक्तः साहित्यबोधः।
4. विश्वसाहित्यस्वरूपस्य अवबोधः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. काव्यशास्त्रस्य ज्ञानं प्राप्य समाजे तदुपयोगित्वं प्रतिपादयितुं शक्ष्यन्ति।
2. साहित्यस्य सामकालिकताया: कालक्रमस्य च गवेषणं कर्तुं शक्ष्यन्ति।
3. तुलनात्मकं, समालोचनात्मकं च दृष्टिकोणं विकसिष्यन्ति।
4. विश्वसाहित्ये भारतस्य स्थानं दृढं प्रतिपादयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.5	प्राच्यपाश्चात्य-साहित्यस्य तुलनात्मकमध्ययनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. तुलनात्मकसाहित्यम्। **श्रेयोऽङ्कः १**

- तुलनात्मकसाहित्यस्य परिभाषा-विधिश्चेति।
- विश्वे तुलनात्मकसाहित्यम्।
- भारते तुलनात्मकसाहित्यम्।
- भारतीयसाहित्यस्य सामान्यपरिचयः।
- विश्वसाहित्यस्य सामान्यपरिचयः।

अन्वितिः २. विश्वसाहित्यस्य प्रसिद्ध-लेखकानां तत्कृतीनाञ्च विश्लेषणम्। **श्रेयोऽङ्कः १**

- शेक्सपियर।
- सोफोक्लेस (Sophocles)

- मोलियरे (Moliere)
- ओडिपस रेक्स (Oedipus Rex)
- टार्टुफे (Tartuffe)

अन्विति: ३. भारतीयसाहित्यस्य प्रसिद्ध-लेखकानां तत्कृतीनाञ्च विश्लेषणम्। **श्रेयोऽङ्कः १**

- कालिदासः।
- भासः।
- शूद्रकः।
- भवभूति।
- बाणभट्टः।

अन्विति: ४. भारतीयविश्वसाहित्ययोः काव्यतत्त्वयोः तुलनात्मकध्ययनम्। **श्रेयोऽङ्कः १**

- कथानकपरम्परा।
- शोकनाट्यं नायकविचारश्च (Tragedy and Heroism)
- तात्त्विक-आधाराः।
- स्त्रीपात्राणां पात्रचित्रणम्।
- नाटकस्य अन्तिमो भागः (दुखान्तः/सुखान्तः)
- रसभावविचारः (Aesthetics and Emotional Theory)
- नैतिकताबोधः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. ऋषि, उमाशंकर, *संस्कृत साहित्य का इतिहास*, वाराणसी : चौखम्बा भारती अकादमी।
2. हीरा, डा. राजवंश सहाय, (1967), *भारतीय काव्यशास्त्र के प्रतिनिधि सिद्धान्त*, वाराणसी : चौखम्बा विद्याभवन।
3. Comparative Literature: Method and Perspective (1961), Carbondale: Southern Illinois University Press.
4. Aristotle. *The Poetics*.
5. Bassnett, S., (1993), *Comparative Literature: A Critical Introduction*. Oxford: Blackwell Publishers.
6. Domínguez, C., Saussy, H., & Villanueva, D., *Comparative Literature: A Critical Introduction*.
7. Behdad, A., & Thomas, D., *A Companion to Comparative Literature*.
8. Jung, C. G., *Eastern Wisdom and Western Thought*.
9. Devy, G. N., *Indian Literary Theory: A Reader*.
10. Ganguly, D., *World Literature and India: Between Home and the World*.

सहायकाः ग्रन्थाः (Additional Readings)

1. काणे, पी. वी., & शास्त्री, डा. ईश्वर चन्द्र। (2007), *संस्कृतकाव्यशास्त्र का इतिहास*. दिल्ली : मोतीलाल बनारसीदास।
2. Wellek, R., (1963), *The Crisis of Comparative Literature*. Ithaca: Cornell University Press.
3. Das, B. K., (1977), *Comparative Literature in India*. Cuttack: Papyrus.
4. George, K. M. (Ed.), (1984), *Comparative Indian Literature*. Madras: Macmillan India.
5. Bloom, H., (1994), *The Western Canon*. New York: Harcourt Brace.

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

चतुर्थसत्रार्द्धः (Semester - 4)

प्रधानः पाठ्यक्रमः (Major) 2.6: ध्वनिसिद्धान्तः - आनन्दवर्धनः अभिनवगुप्तः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयज्ञानपरम्परायां ध्वनिसिद्धान्तस्य महत्त्वप्रतिपादनम्।
2. आनन्दवर्धनस्य अभिनवगुप्तस्य च योगदानस्य ज्ञानप्रदानम्।
3. भारतीयशास्त्रपरम्परायाः संरक्षणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयज्ञानपरम्परायां ध्वनिसिद्धान्तस्य महत्त्वविषये दृढं प्रतिपादयिष्यन्ति।
2. ध्वनेः काव्यात्मत्वं निरूपयिष्यन्ति।
3. अलङ्कारशास्त्रे ध्वनेः प्राधान्यं वक्ष्यन्ति।
4. आनन्दवर्धन-अभिनवगुप्तयोः च काव्यशास्त्रीय-योगदानविषये वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.6	ध्वनिसिद्धान्तः - आनन्दवर्धनः अभिनवगुप्तः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. आलङ्कारशास्त्रे ध्वनिप्रस्थानम्। **श्रेयोऽङ्कः १**

- ध्वन्यालोकस्य परिचयः।
- आनन्दवर्धनस्य परिचयः देशः कालः इत्यादि।
- आनन्दवर्धनस्य कृतयः।
- अभिनवगुप्तः तत्कृतयश्च।
- ध्वनिसिद्धान्तस्य आविष्कारः।

अन्वितिः २. ध्वनिसिद्धान्तः। **श्रेयोऽङ्कः १**

- ध्वनेः काव्यात्मत्वम्।
- अभाववादः।

- भाक्तवादः अनिर्वचनीयवादः च।
- वस्तुध्वनिः।
- अलङ्कारध्वनिः।
- रसध्वनिः।
- अभाव-भाक्त-अनिर्वचनीयतावादस्य निराकरणम्।
- लक्षणामूलध्वनिः अभिधामूलध्वनिः च।

अन्वितिः ३. ध्वनिप्रकाराः। **श्रेयोऽङ्कः १**

- अविवक्षितवाच्यध्वनिः।
- विवक्षितान्यपरवाच्यध्वनिः।
- अर्थान्तरसङ्क्रमितवाच्यध्वनिः।
- अत्यन्ततिरस्कृतवाच्यध्वनिः।

अन्वितिः ४. रसस्य प्राधान्यम्। **श्रेयोऽङ्कः १**

- रसादेः ध्वनित्वम् अलङ्कारत्वं च।
- रसध्वनिप्रभेदानाम् अनन्तत्वम्।
- भारतीयज्ञानपरम्परायां ध्वनिप्रस्थानस्य महत्त्वम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. आनन्दवर्धनः, (2010), *ध्वन्यालोकः* (१, २ उद्योतौ), वाराणसी : चौखम्बा विद्याभवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. डॉ. श्रीजयमन्तमिश्र, (2005), *काव्यात्ममीमांसा*, वाराणसी : चौखम्बा विद्याभवन।
2. काणे, पी. वी., & शास्त्री, डॉ. ईश्वर चन्द्र, (2007), *संस्कृतकाव्यशास्त्र का इतिहास*, दिल्ली : मोतीलाल बनारसीदास।

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.7: रससिद्धान्तः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. रससिद्धान्तस्य परिचयप्रदानम्।
2. रसविषयकविभिन्नमतानामवबोधनम्।
3. साहित्ये रसानां महत्त्वविषये भावात्मकावबोधः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. रससिद्धान्तस्य परिचयं वक्ष्यन्ति।
2. रसविषयकविभिन्नमतानि दृढं प्रतिपादयिष्यन्ति।
3. रससूत्रस्य व्याख्यातॄणां वर्णनं करिष्यन्ति।
4. रसानां मानवजीवनोपयोगित्वविषये व्याख्यास्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.7	रससिद्धान्तः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. नाट्यशास्त्रे रसस्यावधारणा। **श्रेयोऽङ्कः १**

- रससूत्रं तस्य व्याख्यानञ्च।
- विभावः।
- अनुभावः।
- व्यभिचारिभावः।
- स्थायिभावः।
- रसस्य भेदाः।

अन्वितिः २. रससूत्रस्य व्याख्यातारः - 1 (भट्टलोल्लटः श्रीशङ्कुकश्च) **श्रेयोऽङ्कः १**

- रससिद्धान्तस्य व्युत्पत्तिः।
- उत्पत्तिवादस्य परिचयः।
- वेदान्तदर्शनानुसारं उत्पत्तिवादस्य समीक्षा।
- अनुमितिवादस्य परिचयः।

- न्यायदर्शनानुसारं अनुमितिवादस्य समीक्षाः।

अन्विति: ३. रससूत्रस्य व्याख्यातारः - 2 (भट्टनायकः अभिनवगुप्तश्च) **श्रेयोऽङ्कः १**

- भुक्तिवादस्य परिचयः।
- रसास्वादने साधारणीकरणस्य विचारः।
- साङ्ख्यदर्शनानुसारं भुक्तिवादस्य समीक्षा।
- अभिव्यक्तिवादस्य परिचयः।
- साधारणीकरणविषये अभिनवगुप्तस्य दृष्टिः।
- रसो न ज्ञाप्यः न कार्यः।
- रसस्य अलौकिकत्वम्।

अन्विति: ४. रसविषये अन्ये शास्त्रकाराः। **श्रेयोऽङ्कः १**

- महिमभट्टः।
- धनञ्जयः।
- आनन्दवर्धनः।
- भारतीयज्ञानपरम्परायां ध्वनिप्रस्थानस्य महत्त्वम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. भरतमुनिः, (2002), *नाट्यशास्त्रम्* (सम्पा. पं. केदारनाथः), दिल्ली : राष्ट्रियसंस्कृतसंस्थानम्।
2. मम्मटः, (2008), *काव्यप्रकाशः* (भट्टवामनाचार्यः, झलकीकरः), दिल्ली : परिमल पब्लिकेशनम्।
3. आनन्दवर्धनः, (2009), *ध्वन्यालोकः* (सम्पा. जगन्नाथपाठकः), वाराणसी : चौखम्बा विद्याभवन।
4. महिमभट्टः, (2016), *व्यक्तिविवेकः* (सम्पा. रेवाप्रसादद्विवेदी), वाराणसी : चौखम्बा संस्कृत भवन।
5. धनञ्जयः, *दशरूपकम्*, वाराणसी : चौखम्बा संस्कृत भवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. डॉ. श्रीजयमन्तमिश्र, (2005), *काव्यात्ममीमांसा*, वाराणसी : चौखम्बा विद्याभवन।
2. काणे, पी. वी., & शास्त्री, डॉ. ईश्वर चन्द्र, (2007), *संस्कृतकाव्यशास्त्र का इतिहास*, दिल्ली : मोतीलाल बनारसीदास।

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.8: अलङ्कारशास्त्रस्य सामाजिकमहत्त्वम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयज्ञानपरम्परायां काव्यशास्त्र-सौन्दर्यशास्त्र-विविधदर्शनानां ज्ञानप्रदानम्।
2. रस-ध्वनि-अलंकार-रीति-वक्रोक्ति-औचित्य-आदिषु विषयेषु सामान्यावबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. काव्यशास्त्रस्य ज्ञानं प्राप्य समाजे तदुपयोगित्वं प्रतिपादयितुं शक्ष्यन्ति।
2. सौन्दर्यशास्त्रस्य विषये निरूपणं करिष्यन्ति।
2. दैनन्दिनवाग्व्यवहारे अलङ्कारशास्त्रस्य व्याप्तिं वर्णयिष्यन्ति।
3. विविधकाव्यशास्त्रीय सिद्धान्तानां समाजमूलकतां प्रतिपादयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.8	अलङ्कारशास्त्रस्य सामाजिकमहत्त्वम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. संस्कृतसाहित्यम्। **श्रेयोऽङ्कः १**

- समाजे साहित्यम्।
- सौन्दर्यसिद्धान्ताः।
- अमरुशतकम्।
- प्राकृतसाहित्यम्।
- गाथासप्तशती।

अन्वितिः २. सौन्दर्यशास्त्रम्। **श्रेयोऽङ्कः १**

- शब्दालङ्काराः।
- अर्थालङ्काराः।
- काव्यगुणाः।
- रसभावादयः।

अन्वितिः ३. रीति-वक्रोक्ति-औचित्यसम्प्रदायाः। **श्रेयोऽङ्कः १**

- वक्रोक्तिजीवितम्।
- औचित्यविचारचर्चा।
- उक्तसम्प्रदायेषु सौन्दर्यदर्शनम्।

अन्वितिः ४. सौन्दर्यसिद्धान्तः। **श्रेयोऽङ्कः १**

- भारतीयसौन्दर्यनिष्कर्षः।
- भारतीयज्ञानपरम्परायां कलानां महत्त्वम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. सिंह, मुरलीमनोहरप्रसाद, (1964), *अलंकारमीमांसा*, पटना : भारती भवन।
2. हीरा, डा. राजवंश सहाय, (1967), *भारतीय काव्यशास्त्र के प्रतिनिधि सिद्धान्त*, वाराणसी : चौखम्बा विद्याभवन।
3. उपाध्याय, आचार्य बलदेव, (2001), *संस्कृत साहित्य का इतिहास*, वाराणसी : शारदा निकेतन।
4. पाण्डेय, रमाकान्त, (2012), *वक्रोक्तिजीवितम्*, जयपुर : जगदीशसंस्कृतपुस्तकालय।
5. ऋषि, उमाशंकर, *संस्कृत साहित्य का इतिहास*, वाराणसी : चौखम्भा भारती अकादमी।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीजयमन्तमिश्र, डा. (2005), *काव्यात्ममीमांसा*, वाराणसी : चौखम्बा विद्याभवन।
2. काणे, पी. वी., & शास्त्री, डा. ईश्वर चन्द्र, (2007), *संस्कृतकाव्यशास्त्र का इतिहास*, दिल्ली : मोतीलाल बनारसीदास।

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.9: पौराणिकसाहित्यस्य विशिष्टाध्ययनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. पुराणानां स्वरूपं परिचयश्च।
2. भारतस्य संरक्षितायाः बहुमूल्यसभ्यतायाः वर्णनम्।
3. पौराणिकसिद्धान्तानाम् अध्ययनम्।
4. भौगोलिकदृष्ट्या पुराणानाम् अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयजनानां जीवनस्य सांस्कृतिकस्य च स्वरूपनिर्माणे पुराणानां प्रमुखां भूमिकां वक्ष्यन्ति।
2. सामाजिक-आर्थिक-भौगोलिक-राजनैतिक-दार्शनिक-शैक्षिक-व्यवस्थां वर्णयिष्यन्ति।
3. पुराणसाहित्यस्य काव्यसौन्दर्यरसध्वन्यलंकारादयश्च वक्ष्यन्ति।
4. पौराणिकसाहित्यस्य सामग्रीम् ऐतिहासिकं महत्त्वं च दृढं प्रतिपादयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.9	पौराणिकसाहित्यस्य विशिष्टाध्ययनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. पुराणपरिचयः। **श्रेयोऽङ्कः १**

- पुराणानां परिभाषा/लक्षणम्।
- पुराणानां विभाजनम्।
- पुराण-उपपुराणयोः भाषा-शैली-सम्बन्धश्चेति।

अन्वितिः २. विषयवस्तुविश्लेषणम्। **श्रेयोऽङ्कः १**

- ब्रह्मपुराणे सिन्धुघाटिसभ्यतायाः विषयवस्तु ।
- उपपुराणानां सामाजिकविषयवस्तु।
- पुराणानाम् ऐतिहासिकं महत्त्वम्।

अन्वितिः ३. पुराणानां भौगोलिकाध्ययनम्। **श्रेयोऽङ्कः १**

- विष्णुपुराणे भौगोलिकविषयाः।
- शिवपुराणे वर्णितः जम्बूद्वीपः।
- विष्णुपुराणे राष्ट्रस्य अवधारणा।

- भारतस्य स्वरूपं मार्कण्डेयलिङ्गविष्णुधर्मोत्तरपुराणादिविशेषसन्दर्भे।

अन्वितिः ४. अग्निपुराणे वर्णितकाव्यतत्त्वानां अध्ययनम्। **श्रेयोऽङ्कः १**

- अग्निपुराणे वर्णितकाव्यलक्षणानां विश्लेषणम्।
- अग्निपुराणे वर्णितमहाकाव्यलक्षणानां विश्लेषणम्।
- अग्निपुराणे वर्णितानाम् अनुप्रास-यमक-उपमा-रूपक-विभावना-सन्देहालङ्काराणां विश्वलेषणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. हीरा, डा. राजवंश सहाय, (1967), *भारतीय काव्यशास्त्र के प्रतिनिधि सिद्धान्त*, वाराणसी : चौखम्बा विद्याभवन।
2. चतुर्वेदी, गिरिधरशर्मा, (1970), *पुराणपरिशीलन*, पटना : विहार राष्ट्र भाषा परिषद्।
3. गङ्गाधर, पण्डा, *संस्कृत वाङ्मय का वृहद् इतिहास (पुराण खण्ड-१३)*, लखनऊ : उत्तर प्रदेश संस्कृत संस्थान।
4. चतुर्वेदी, गिरिधरशर्मा, & शर्मा, शिवदत्त, *पुराण विद्या*, जयपुर : राजस्थान संस्कृत अकादमी।
5. उपाध्याय, बलदेव, *पुराणविमर्शः*, वाराणसी : चौखम्बा विद्याभवन।
6. Aiyar, N. K. (1914–1916). *The Puranas in the Light of Modern Sciences*. Adyar.
7. Hazra, R. C. (1962). *The Puranas: The Upapuranas in the Cultural Heritage of India (Vol. II)*. Calcutta: R. K. Mission Institute.
8. Bhattacharji, S. (1970). *The Indian Theogony: A Comparative Study of Indian Mythology from the Vedas to the Puranas*. Cambridge: Cambridge University Press.

सहायकाः ग्रन्थाः (Additional Readings)

1. Mankad, D. R. (1951). *Puranic Chronology*. Anand, Gujarat: Gangajala Prakashan.
2. Hazra, R. C. (1975). *Studies in the Puranic Records on Hindu Rites and Questions (Reprint)*. Delhi: Motilal Banarasidass.
3. Rochetore, Ludo. (1986). *The Puranas (A History of Indian Literature) (Vol. IV)*. Wiesbaden: Otto Harrassowitz.
4. Ali, S. M. (1996). *The Geography of the Puranas*. New Delhi: Peoples Publishing House.

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.10: अलङ्काराः (जयदेवमतानुसारेण)

पाठ्यक्रमस्य उद्देश्यानि (Course Objective)

1. जयदेवस्य तद्ग्रन्थस्य च परिचयप्रदानम्।
2. चन्द्रालोकस्य सम्यक् परिज्ञानम्।
3. जयदेवेन निरूपितानाम् अलङ्काराणां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. जयदेवस्य तद्ग्रन्थस्य च परिचयं कथयिष्यन्ति।
2. छात्राः निर्दिष्टानाम् अलङ्काराणां परिचयं वक्ष्यन्ति।
3. विभिन्नप्रतियोगितासु निर्दिष्टपाठ्यक्रमे एतान् अलङ्कारान् निरूपयिष्यन्ति।
4. काव्येषु एतान् अलङ्कारान् समीक्षितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.10	अलङ्काराः (जयदेवमतानुसारेण)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. जयदेवस्य तद्ग्रन्थस्य च परिचयः। **श्रेयोऽङ्कः १**

- काव्ये अलङ्काराणां स्थानम्।
- जयदेवस्य परिचयः।
- चन्द्रालोकस्य परिचयः।
- अलङ्कारलक्षणम्।
- शब्दालङ्कारः अर्थालङ्कारश्च।

अन्वितिः २. अलङ्काराः। **श्रेयोऽङ्कः १**

- अनुप्रासः, अनुप्रासभेदाः।
- यमकम्, उपमा, रूपकं, परिणामः।
- उल्लेखः, अपह्नुतिः, उत्प्रेक्षा।
- अनुमानं, भ्रान्तिमान्, सन्देहः।

अन्वितिः ३. अलङ्काराः - 2 **श्रेयोऽङ्कः १**

- काव्यलिङ्गः, तुल्ययोगिता, परिकरः।
- दीपकं प्रतिवस्तूपमा, दृष्टान्तः।
- निदर्शना, व्यतिरेकः, समासोक्तिः।
- भङ्गश्लेषः, अप्रस्तुतप्रशंसा, अर्थान्तरन्यासः।

अन्वितिः ४. अलङ्काराः - 3 **श्रेयोऽङ्कः १**

- व्याजस्तुतिः, विरोधः, विभावना।
- विशेषोक्तिः, सारः, परिवृत्तिः।
- परिसङ्ख्या, समुच्चयः, तद्गुणः।
- व्याजोक्तिः, वक्रोक्तिः, स्वभावोक्तिः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जयदेवः, *चन्द्रालोकः (पञ्चममयूखः)* (व्याख्या. डा. श्रीकृष्णमणि त्रिपाठी), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. जयमन्तमिश्रः, डा., (2005), *काव्यात्ममीमांसा*, वाराणसी : चौखम्बा विद्या भारती।
2. उपाध्यायः, बलदेव., *संस्कृतवाङ्मय का बृहद् इतिहास (काव्यशास्त्रखण्ड)*, लखनऊ : उत्तरप्रदेश संस्कृत संस्थान।

तृतीयवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

पञ्चमसत्रार्द्धः (Semester - 5)

प्रधानः पाठ्यक्रमः (Major) 3.1: भारतीयकाव्यशास्त्रे रसो नायकश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयकाव्यशास्त्रस्य परिचयप्रदानम्।
2. रसस्वरूपस्य तद्भेदानां च ज्ञानप्रदानम्।
3. नायकस्वरूपस्य तद्भेदानां च ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वेदे साहित्यशास्त्रे च रसस्य महत्त्वं प्रतिपादयिष्यन्ति।
2. काव्यशास्त्रे रसस्य स्वरूपं तद्भेदाँश्च निरूपयिष्यन्ति।
3. काव्यशास्त्रे रसस्य अलौकिकत्त्वं वर्णयिष्यन्ति।
4. नायकानां भेदपरम्परायाः वर्णनं करिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.1	भारतीयकाव्यशास्त्रे रसो नायकश्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वेदे साहित्यशास्त्रे च रसः। **श्रेयोऽङ्कः १**

- रसशब्दस्य व्युत्पत्तिः।
- वेदे उपनिषदि च रसशब्दप्रयोगः।
- प्राचीनालङ्कारिकाणां रसविषयिणी अवधारणा।
- काव्ये रसस्य स्थानम्।
- रससूत्रं तस्य व्याख्यानं च (विभावः, अनुभावः, व्यभिचारी, स्थायिभावः)।

अन्वितिः २. रससिद्धान्तः रसभेदाश्च। **श्रेयोऽङ्कः १**

- भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशङ्कुकस्य अनुमितिवादश्च।
- भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादश्च।

- शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः।
- बीभत्सः, अद्भुतः, शान्तः, शान्तस्य रसत्वम्।

अन्वितिः ३. रसस्य अलौकिकत्वम्। **श्रेयोऽङ्कः १**

- करुणादौ रसे सुखानुभवता।
- रसास्वादने साधारणीकरणम्।
- रसो न अनुकार्यगतः।
- रसः न ज्ञाप्यः न कार्यः।
- रसः न नित्यः, न सविकल्पकज्ञानवेद्यः, न निर्विकल्पकज्ञानवेद्यः।

अन्वितिः ४. नायकः तद्भेदाश्च। **श्रेयोऽङ्कः १**

- नायकलक्षणं, धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरप्रशान्तः च।
- दक्षिणः, धृष्टः, अनुकूलः, शठः च।
- नायकसहायकाः- पीठमर्दः, विटः, विदूषकः, दूतः, दूती।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. भरतमुनिः, (2002), नाट्यशास्त्रं (सम्पा. पं. केदारनाथः), नयी दिल्ली : राष्ट्रियसंस्कृतसंस्थानम्।
2. मम्मटः, (2005), काव्यप्रकाशः (सम्पा. झल्लकीकरः), दिल्ली : परिमलप्रकाशनम्।
3. विश्वनाथः, (2008), साहित्यदर्पणः (सम्पा. आचार्यलोकमणिदहालः), वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीजयमन्तमिश्रः, डा., (2005), काव्यात्ममीमांसा, वाराणसी : चौखम्बा विद्याभवन।
2. काणे, पी. वी., & शास्त्री, डा. ईश्वर चन्द्र, (2007), संस्कृतकाव्यशास्त्र का इतिहास, दिल्ली : मोतीलाल बनारसीदास।

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.2: नलदमयन्त्योः चरितम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. नलदमयन्त्योः उदात्तचरितस्य बोधनम्।
2. नायक-नायिकयोः प्रेमादर्शप्रकाशनम्।
3. अनुरागभाक्सु गुणानामन्वेषणम्।
4. श्रीहर्ष-विक्रमभट्टयोः रसालङ्कारयोजनाकौशलप्रकाशनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. नलदमयन्त्योः उदात्तचरितं वर्णयिष्यन्ति।
2. श्रीहर्ष-विक्रमभट्टयोः रसालङ्कारयोजनाकौशलम् प्रतिपादयिष्यन्ति।
3. महाभारतस्य वनपर्वणः कथावस्त्वधिकृत्य विवरणं दास्यन्ति।
4. उभयो कव्योः जीवनवृत्तं वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.2	नलदमयन्त्योः चरितम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. कथावस्तु-आधारितं काव्यम्। **श्रेयोऽङ्कः १**

- महाभारतस्य वनपर्वणः कथावस्तु।
- नैषधीयचरितस्य वैशिष्ट्यम्।
- श्रीहर्षस्य जीवनवृत्तम्।
- नलचम्प्वोः कथावस्तु।
- त्रिविक्रमभट्टस्य जीवनवृत्तम्।

अन्वितिः २. नलचरित्रवर्णनम्। **श्रेयोऽङ्कः १**

- नलस्य प्रतापादिगुणवर्णनम्।
- नलाननस्य अप्रतिमत्ववर्णनम्।

- दमयन्त्याः मदनावेशः, प्रसङ्गेन कामस्य प्रवृत्तिः।

अन्वितिः ३. प्रियविप्रयुक्तस्य नलस्योद्गाराः। **श्रेयोऽङ्कः १**

- नलस्य हृदये दमयन्तीं प्रति वर्धितानुरागः।
- केतकं प्रति नलस्याक्रोशः।
- नलस्य स्थलपद्मिनीदर्शनम्।

अन्वितिः ४. श्रीहर्ष-त्रिविक्रमभट्टयोः रसालङ्कारयोजननैपुण्यम्। **श्रेयोऽङ्कः १**

- नैषधीयचरिते तडागवर्णनम्।
- नैषधीयचरिते हंसदर्शनम्।
- नलचम्प्वां हंसकृतं नलस्य गुणप्रशंसनम्।
- नलचम्प्वां हंसेन नलाय मुक्तावलीसमर्पणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. त्रिविक्रमभट्टः, (2000), नलचम्पूः, वाराणसी : चौखम्बा संस्कृत संस्थान।
2. श्रीहर्षः, (2010), नैषधीयचरितं, वाराणसी : चौखम्बा विद्याभवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, आचार्य बलदेव, (2001), संस्कृत साहित्य का इतिहास, वाराणसी : शारदा निकेतन।
2. द्विवेदी, कपिलदेव, (2007), संस्कृत साहित्य का समीक्षात्मक इतिहास, दिल्ली : विश्वविद्यालय प्रकाशन।

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः- 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.3: यौवनसमयोचितः उपदेशः (शुकनासोपदेशानुसारेण)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. बाणभट्टस्य काव्यकौशलपरिचयप्रदानम्।
2. यौवनोचितविविधोपदेशानाम् अवबोधनम्।
3. शुकनासोपदेशदिशा लक्ष्म्याः विषये अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. गद्यसाहित्यस्य वैशिष्ट्यं वक्ष्यन्ति।
2. उपदेशसाहित्यम् वर्णयिष्यन्ति।
3. शुकनासोपदेशवर्णितराजनीतिम् अधिकृत्य विवरणं कथयिष्यन्ति।
4. शुकनासोपदेशवर्णितलक्ष्म्याः विलासविषयं वर्णयिष्यन्ति।
5. बाणभट्टस्य समासप्रयोगकौशलं प्रदर्शयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रम--कूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.3	यौवनसमयोचितः उपदेशः (शुकनासोपदेशानुसारेण)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. शुकनासोपदेशः। **श्रेयोऽङ्कः १**

- उपदेशपरम्परायाः परिचयः।
- बाणस्य कादम्बर्याश्च परिचयः।
- शुकनासस्य व्यक्तित्वम्, दारुणो लक्ष्मीमदः।
- अनर्थपरम्परा, रागमलावलेपदोषः च।

अन्वितिः २. पुरुषस्य स्वभावः। **श्रेयोऽङ्कः १**

- यौवनकालस्य दोषाः।
- मनसः मृगतृष्णिका।
- अत्यासङ्गदोषः।
- हितोपदेशेषु अश्रद्धा।

अन्वितिः ३. राजप्रकृतिः। **श्रेयोऽङ्कः १**

- राजलक्ष्मीप्रभावः।

- लक्ष्मीचिह्नानि।
- लक्ष्म्याः दुःखेन परिपालनम्।
- लक्ष्म्याः विपरीतवृत्तिः लक्ष्म्याः परिभ्रमः च।

अन्वितिः ४. लक्ष्म्याः विलासः। **श्रेयोऽङ्कः १**

- लक्ष्म्याः विश्वरूपत्वग्रहणम्।
- लक्ष्म्याः कोशमण्डलमोक्षः।
- लक्ष्म्याः चाञ्चल्यम्।
- लक्ष्म्याः तमोबाहुल्यं सर्वाविनयानां पुरःपताका च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. बाणभट्टः, (2019), *कादम्बरी (शुकनासोपदेशः)*, वाराणसी : चौखम्बा विद्याभवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. कीथ, ए. बी., & शास्त्री, डा. मंगलदेव, (1967), *संस्कृत साहित्य का इतिहास*, दिल्ली : मोतीलाल बनारसीदास।
2. द्विवेदी, कपिलदेव, (2007), *संस्कृत साहित्य का समीक्षात्मक इतिहास*, दिल्ली : विश्वविद्यालय प्रकाशन।

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.4: रामस्य राजधर्मनिर्वहणम् (रघुवंशस्य त्रयोदश- चतुर्दशसर्गौ)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. कालिदासकृतानां काव्यानां तथा भौगोलिकस्थानानां च परिचयप्रदानम्।
2. रामस्य राजधर्मनिर्वहणस्य अवबोधनम्।
3. कौटिल्यस्य राजधर्मदृष्टिकोणस्य अवबोधनम्।
4. सीतापरित्यागस्य परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्राचीनभारतस्य भौगोलिकस्थानानां परिचयं वदिष्यन्ति।
2. रामस्य राजधर्मनिर्वहणस्य वर्णनं करिष्यन्ति।
3. करुणरसास्वादनदृष्ट्या सीतापरित्यागं समीक्षितुं शक्ष्यन्ति।
4. वर्तमानराजनीतौ कौटिल्यदर्शनस्य उपयोगितां वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.4	रामस्य राजधर्मनिर्वहणम् (रघुवंशस्य त्रयोदश- चतुर्दशसर्गौ)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. राज्यधर्मस्य अवधारणा। **श्रेयोऽङ्कः १**

- कौटिल्यस्य राजधर्माः।
- महाभारते राजधर्माः।
- राजधर्मस्वरूपम्।
- लोककल्याणे राजकीयस्य योगदानम्।

अन्वितिः २. महाकविकालिदासः तद्ग्रन्थाश्च। **श्रेयोऽङ्कः १**

- कालिदासस्य परिचयः।
- रघुवंशमहाकाव्यस्य परिचयः।
- कालिदासेन रचितानि अन्यानि काव्यानि।
- कालिदासेन कृतं भौगोलिकवर्णनं (समुद्रः, जनस्थानम्, माल्यवान् पर्वतः,पम्पासरोवरः)

अन्वितिः ३. सीतानिर्वासनम्। **श्रेयोऽङ्कः १**

- रामस्य राज्याभिषेकः।
- रामेण जननीप्रभृतीनां सान्त्वनं चित्रमात्रशेषस्य पितुर्निकेते प्रवेशश्च।
- सीतया गर्भस्य धारणम्।
- रामेण सीताविषयकस्य लोकापवादस्य श्रवणं निर्वासनस्य निश्चयश्च।

अन्वितिः ४. वाल्मीकिना सीतायाः स्वाश्रमं प्रति नयनम्। **श्रेयोऽङ्कः १**

- रामादेशस्य श्रवणेन सीतायाः करुणा दशा।
- सीताया रामं प्रति संदेशः।
- विलपन्त्याः सीतायाः समीपं कारुणिकस्य वाल्मीकेरागमनं स्वाश्रमं प्रति सीतायाः नयनं च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. कालिदासः, *रघुवंशम्* (त्रयोदश-चतुर्दशसर्गौ), वाराणसी : चौखम्बा सुरभारती प्रकाशन।
2. उदयवीरशास्त्रीः, *कौटिलीयार्थशास्त्रम् – प्रथमाध्यायस्य अंशः (राजस्वरूपविवेचनम्)*, लाहौर : संस्कृतपुस्तकालयः।
3. *महाभारतम्*, गोरखपुर : गोरखपुरमुद्रणालयः।

सहायकाः ग्रन्थाः (Additional Readings)

1. ऋषि, उमाशंकर, *संस्कृत साहित्य का इतिहास*, वाराणसी : चौखम्भा विश्वभारती अकादमी।
2. उपाध्याय, आचार्य बलदेव, *संस्कृत साहित्य का इतिहास*, वाराणसी : शारदा निकेतन।
3. कालिदासः, *कालिदास ग्रन्थावली* (सम्पा. ब्रह्मानन्दत्रिपाठी, पं. रामतेजशास्त्री), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः- 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.5: किरातार्जुनीयमहाकाव्ये राजनैतिकाः विचाराः (प्रथमसर्गः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. किरातार्जुनीयमहाकाव्ये वर्णितस्य राजनैतिकविचारस्य बोधनम्।
2. गुप्तचरस्य कर्तव्यविषये सम्यक् अवबोधनम्।
3. महाकविभारवेः काव्यकौशलपरिचयप्रदानम्।
4. द्रौपद्योपदिष्टं विजयार्थिनां राज्ञां कर्तव्यस्य अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दुर्योधनस्य कुटिलराजनीतिं वर्णयिष्यन्ति।
2. द्रौपद्योपदिष्टं विजयार्थिनां राज्ञां कर्तव्यवर्णनं करिष्यन्ति।
3. शमादिगुणानां निरूपणं करिष्यन्ति।
4. गुप्तचरस्य धर्मान् कथयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.5	किरातार्जुनीयमहाकाव्ये राजनैतिकाः विचाराः (प्रथमसर्गः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. गुप्तचरस्य धर्माः। **श्रेयोऽङ्कः १**

- महाकविभारवेः परिचयः।
- किरातार्जुनीयस्य कथासारः।
  - वनेचरस्य युधिष्ठिरं प्रति हस्तिनापुरात् प्रत्यागमनम्।
  - युधिष्ठिरहितैषिणः वनेचरस्य सत्यवादिता।
  - वनेचरस्य वाचो गुणाः।
  - गुप्तचरस्य धर्माः।

अन्वितिः २. दुर्योधनस्य राजनीतिः। **श्रेयोऽङ्कः १**

- सर्वसम्पदां प्राप्तेः कारणम्।
- राजनीतिर्दुर्बोधा।

- दुर्योधनस्य नयेन जगतीं जिगीषा।
- अनार्यसङ्गमात् महात्मविरोधोऽपि वरम्।
- दुर्योधनस्य सखिप्रभृतीन् प्रति व्यवहारः।
- दुर्योधनेन महौजसां स्ववशे स्थापनम्।
- दुर्योधनशासने प्रजानां स्थितिः।
- गुप्तचरादिनियुक्तिः।
- राजनीतेः साफल्यम्।
- युधिष्ठिरेण सत्कृतस्य वनेचरस्य गमनम्।

अन्वितिः ३. द्रौपद्योपदिष्टं विजयार्थिनां राज्ञां कर्तव्यम्। **श्रेयोऽङ्कः १**

- युधिष्ठिरोपालम्भः।
- मायाविषु मायाविभिर्भाव्यम्।
- पराक्रमवतः पराभवः अप्युत्सवः।
- शमो मुनीनां सिद्धेः कारणं, न तु राज्ञाम्।
- विजयार्थिभिः सन्धिर्न पालनीयः।

अन्वितिः ४. युधिष्ठिरेण भीमस्य प्रसादनम्। **श्रेयोऽङ्कः १**

- द्रौपद्या वाचो गुणाः।
- सकोपस्य भीमस्य युधिष्ठिरं प्रत्युपालम्भः।
- द्रौपदीमतं समर्थनं कुर्वता भीमेन पराक्रमं प्रदर्शयितुं युधिष्ठिरस्य प्रेरणम्।
- भीमस्य प्रसादनं प्रशमस्य माहात्म्यम्।
  - भीमस्य वाचो गुणाः।
  - अविचार्य किमपि न कर्तव्यम्।
  - प्रशमस्य प्रभावः।
  - असदाचारेण लभ्यो जयः पराजय एव।
  - जिगीषुभिः क्रोधो जेयः।
  - श्रियो बहुच्छलाः।
  - तितिक्षासमं जयसाधनं नास्ति।
  - इदानीं पराक्रमस्य नावसरः।
  - मदः अनर्थहेतुः।
  - अणुरपि प्रकृतिप्रकोपजो विग्रहः सकलं निहन्ति।
  - मतिमता अविनयस्य द्विषः समुन्नतिरुपेक्षणीया।
  - भगवतो व्यासस्यागमनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. भारविः, महाकविः, (2010), *किरातार्जुनीयम्* (प्रथमद्वितीयसर्गौ) (सम्पा. पण्डितदुर्गाप्रसाद एवं काशिनाथ पाण्डुरंग परब), दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।

सहायकाः ग्रन्थाः (Additional Readings)

1. ऋषि, उमाशंकर, *संस्कृत साहित्य का इतिहास*, वाराणसी : चौखम्भा विश्वभारती अकादमी।
2. उपाध्याय, आचार्य बलदेव, *संस्कृत साहित्य का इतिहास*, वाराणसी : शारदा निकेतन।
3. कालिदासः, *कालिदास ग्रन्थावली* (सम्पा. ब्रह्मानन्दत्रिपाठी, पण्डित रामतेजशास्त्री), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

षष्ठसत्रार्द्धः (Semester - 6)

प्रधानः पाठ्यक्रमः (Major) 3.6: शिशुपालवधमहाकाव्ये वर्णिता राजनीतिः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. महाकाव्यपरम्पराणां सम्यक् अवबोधनम्।
2. माघस्य काव्यकौशलस्य परिचयप्रदानम्।
3. पुरुषार्थचतुष्टयपरिचयः।
4. काव्यमाध्यमेन राजनीति-अवबोधनम्।
5. भाषणज्ञानं भाषाज्ञानञ्च।
6. उद्धवस्यानुसारेण सामनीतेर्महत्त्वपरिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. महाकाव्यपरम्पराविषये वक्तुं प्रभविष्यन्ति।
2. माघस्य रचनाशैलीं वर्णयितुं शक्ष्यन्ति।
3. प्राचीनराजनीतिविषयाणां विश्लेषणं करिष्यन्ति।
4. बलरामोक्तौ युक्त्युपस्थापनां प्रतिपादयितुं शक्ष्यन्ति।
5. उद्धवस्यानुसारेण सामनीतेर्महत्त्वं वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.6	शिशुपालवधमहाकाव्ये वर्णिता राजनीतिः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. महाकाव्यपरम्परा। **श्रेयोऽङ्कः १**

- महाकाव्यस्य लक्षणम्।
- माघस्य परिचयः।
- शिशुपालवधस्य कथासारः।

अन्वितिः २. बलरामस्य उक्तियाथार्थ्यम्। **श्रेयोऽङ्कः १**

- महीयसां लक्षणम्।

श्रेयोऽङ्काः - 4
होराः - 60

- बलरामस्य स्वरूपम्।
- बलरामस्य उक्तौ दण्डनीतेः महत्त्वम्।
- बलरामेन कृता श्रीकृष्णस्य उक्तिप्रशंसा।

अन्विति: ३. बलरामोक्तौ युक्त्युपस्थापना। **श्रेयोऽङ्कः १**

- वक्तुं स्थितस्य उद्धवस्य कृते आक्षेपः।
- शिशुपालं प्रति आक्रमणे युक्त्युपस्थापना।
- यादवसेनायाः शक्तिप्राचुर्यम्।
- यादवसेनायाः कर्तव्यविषये बलरामेण दत्ता सूचना।

अन्विति: ४. उद्धवस्योक्तौ सामनीतेर्महत्त्वम्। **श्रेयोऽङ्कः १**

- उद्धवेन कृता बलरामस्य उक्तिप्रशंसा।
- सत्कवेः शब्दार्थाश्रयणम् इव राज्ञां पौरुषभाग्ययोः आश्रयणम्।
- शिशुपालं प्रति आक्रमणं नोचितम् इति पक्षे उद्धवस्य युक्तिः।
- शब्दविद्या इव राजनीतिः अपस्पशा नो भाति।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. माघः। (2010)। *शिशुपालवधम्* (श्रीपण्डितहरगोविन्दशास्त्रिणा सम्पादितम्)। वाराणसी : चौखम्बा विद्या भवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. आचार्य बलदेव उपाध्याय। (2001)। *संस्कृत साहित्य का इतिहास*। वाराणसी : शारदा निकेतन।

काठिन्यस्तरः 100-199

(2017)। *संस्कृत साहित्य का इतिहास* (पुनर्मुद्रण)। वाराणसी : चौखम्भा भारती अकादमी।

प्रधानः पाठ्यक्रमः (Major) 3.7: नाटिकापरम्परा रत्नावली च

पाठ्यक्रमस्य उद्देश्यानि (Course Objective)

1. नाटिकापरम्परायाः रत्नावलीनाटिकायाः च अवबोधनम्।
2. नाटकमाध्यमेन प्राचीनभारतस्य स्वरूपस्य परिज्ञानम्।
3. प्राचीननाटकानामध्ययनम्।
4. लौकिकसाहित्ये नाट्यपात्राणां ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. नाटिकापरम्परां वर्णयिष्यन्ति।
2. वासवदत्तायाः राजनि स्थितम् अनुरागम् कथयिष्यन्ति।
3. रत्नावल्यां कदलीगृहवृत्तान्तं प्रतिपादयिष्यन्ति।
4. रत्नावल्याः कथावस्तु व्याख्यास्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.7	नाटिकापरम्परा रत्नावली च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. नाटिकापरम्परा। **श्रेयोऽङ्कः १**

- नाटिकायाः स्वरूपम्।
- उपलब्धाः नाटिकाः।
- रत्नावलीकारस्य श्रीहर्षस्य परिचयः।
- नान्दी।
- नान्द्याः स्वरूपम्।
- रत्नावल्यां नान्दी।
- प्रस्तावना।
- प्रस्तावनायाः स्वरूपम्।
- रत्नावल्यां प्रस्तावना।
- विष्कम्भकः।
- विष्कम्भकस्य स्वरूपम्।
- रत्नावल्यां विष्कम्भकः।
- मदनमहोत्सवः।

अन्वितिः २. कदलीगृहवृत्तान्तः। **श्रेयोऽङ्कः १**

- प्रवेशकः।
- प्रवेशकस्य लक्षणम्।
- सागरिकायाः कदलीगृहे प्रवेशः।
- सागरिकया राज्ञश्चित्रस्य निर्माणं विरहव्यथातिशयेन तस्याः मूर्छा च।
- कदलीगृहे वानरस्य उत्पातः।
- कदलीगृहे राज्ञ उदयनस्य सागरिकया सह समागमः, वासवदत्तागमनशङ्कया सागरिकायाः ततो निष्क्रमणम्।
- चित्रफलके राज्ञा सह सागरिकायाश्चित्रं विलोकितवत्याः वासवदत्तायाः कोपः।

अन्वितिः ३. वासवदत्तावेषभूषया सागरिकया सह राज्ञः समागमः। **श्रेयोऽङ्कः १**

- सुसंगतायाः विदूषकस्य च पुनः राज्ञा सह सागरिका-समागमस्य गुप्तयोजना।
- वासवदत्तावेषभूषया सागरिकया सह समागमायोत्सुकस्य राज्ञो विदूषकेण सह चित्रशालिकाद्वारे प्रवेशः।
- वासवदत्तायाः पुनः कोपो, राज्ञः सागरिकाहेतुको विषादः।
- वासवदत्तावेषया सागरिकया सह राज्ञः समागमः, वासवदत्तायाः पुनः कोपः, प्रसादनाय राज्ञो गमनं च।

अन्वितिः ४. रत्नमालाया अभिज्ञानम्। **श्रेयोऽङ्कः १**

- विदूषकेण राज्ञो हस्ते रत्नमालायाः समर्पणम्।
- सेनापतिरुमण्वतो विजयो राज्ञो यौगन्धरायणे प्रसादश्च।
- ऐन्द्रजालिकवृत्तान्तः, सागरिकाया रत्नावल्या देवीपदप्राप्तिः, भरतवाक्यं च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. *रत्नावलीनाटिका*, वाराणसी : चौखम्भा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. ऋषि, उमाशंकर, (2001), *संस्कृत साहित्य का इतिहास*, वाराणसी : चौखम्भा भारती अकादमी।
2. उपाध्याय, आचार्य बलदेव, (2001), *संस्कृत साहित्य का इतिहास*, वाराणसी : शारदा निकेतन।

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.8: ऐतिहासिकगद्यसाहित्यं - हर्षवर्धनस्य हूणविजययात्रा

पाठ्यक्रमस्य उद्देश्यानि (Course Objective)

1. गद्यसाहित्यपरम्परायाः ज्ञानम्।
2. हर्षवर्धनकालिकस्य इतिहासस्य परिज्ञानम्।
3. तत्कालीनराजनीतेः परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. गद्यसाहित्यपरम्परां वर्णयिष्यन्ति।
2. विजयार्थं राज्यवर्धन-हर्षवर्धनयोः प्रयाणवर्णनं निरूपयिष्यन्ति।
3. राजधान्याम् अशुभसूचनं प्रासादे विपत्परम्परां च व्याख्यास्यन्ति।
4. संस्कृते गद्यरचनासौन्दर्यं वक्तुं शक्ष्यन्ति।
5. संस्कृतसाहित्ये गद्यस्य वैशिष्ट्यं बोधयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.8	ऐतिहासिकगद्यसाहित्यं - हर्षवर्धनस्य हूणविजययात्रा	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. गद्यसाहित्यपरम्परा। **श्रेयोऽङ्कः १**

- प्राचीनकथासाहित्यं (वासवदत्ता, कादम्बरी)
- प्राचीन-आख्यायिकासाहित्यं (दशकुमारचरितम्, हर्षचरितम्)
- बाणभट्टस्य परिचयः।
- हर्षचरितस्य रचनाशैली।

अन्वितिः २. विजयार्थं राज्यवर्धन-हर्षवर्धनयोः प्रयाणम्। **श्रेयोऽङ्कः १**

- हूणान् जेतुं राज्यवर्धन-हर्षवर्धनयोः प्रयाणम्।
- हर्षवर्धनस्य दुःस्वप्नदर्शनम्।

- हर्षवर्धनस्य राजधानीं प्रत्यागमनम्।
- रुग्णस्य पितुः दर्शनम्।

अन्वितिः ३. राजधान्याम् अशुभसूचनम्। **श्रेयोऽङ्कः १**

- महाराजस्य शुश्रूषा।
- प्रभाकरवर्धनस्य पुत्रवात्सल्यम्।
- राज्ञ्या महासतीव्रताचरणम्।
- यशोमत्याः प्रतिज्ञा।

अन्वितिः ४. प्रासादे विपत्परम्परा। **श्रेयोऽङ्कः १**

- हर्षवर्धनं प्रति प्रभाकरवर्धनस्य धैर्याश्वासनम्।
- प्रभाकरवर्धनस्य लोकान्तरगमनम्।
- सम्बन्धिनां राजवल्लभानाम् अवस्था।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. बाणभट्टः, *हर्षचरितम्* (हिन्दीव्याख्या: जगन्नाथपाठकः), वाराणसी : चौखम्बा विद्याभवनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. ऋषि, उमाशंकर, (2001), *संस्कृत साहित्य का इतिहास*, वाराणसी : चौखम्भा भारती अकादमी।
2. उपाध्याय, आचार्य बलदेव, (2001), *संस्कृत साहित्य का इतिहास*, वाराणसी : शारदा निकेतन।
3. उपाध्याय, आचार्य बलदेव (प्रधानसम्पादकः), मिश्र, जयमन्त (सहसम्पादकः), *संस्कृतवाङ्मय का बृहद् इतिहास* (पञ्चम-खण्डः), लखनऊ : उत्तरप्रदेशसंस्कृतसंस्थानम्।

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः- 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.9: हिमालयस्य महत्त्वम्, उमायाः तपस्यायाश्च महत्त्वं (कुमारसम्भवम् - प्रथम-पञ्चमसर्गौ)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. कालिदासस्य काव्यकौशलपरिचयप्रदानम्।
2. हिमालयस्य पुत्र्याः तपसश्च महत्त्वस्य अवबोधनम्।
6. निष्पत्ति-समसम्बन्धि-उत्क्रमनिष्पत्ति-एकान्तरसम्बन्धेत्यादिरेखागणितीयपदार्थानां परिचयः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :–

1. खगोलीयबहुविधक्षेत्राणां, वृत्तानां च परिचयं प्राप्स्यन्ति।
2. गोलीयपरिभाषाध्ययनेन ग्रहगणितोपपत्तिज्ञाने अर्हतां प्राप्स्यन्ति।
3. तुल्यलम्बत्रिभुजानां समानान्तरचतुर्भुजानाञ्च स्वरूपं वर्णयितुं शक्ष्यन्ति।
4. विमण्डल-दृङ्मण्डल-अग्रादीनाम् अवधारणां स्पष्टकर्तुं शक्ष्यन्ति।
5. त्रिभुजानां चतुर्भुजानां विश्लेषणकर्तुं समर्थाः भविष्यन्ति।
6. बहुविधगणितीयसिद्धान्तानां प्रतिपादने कुशलाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	गोलपरिभाषा रेखागणितं च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. गोललक्षणम्। **श्रेयोऽङ्कः १**

- ग्रहकक्षाक्रमः।
- महद्वृत्तलघुवृत्तपरिभाषा।
- गर्भकेन्द्रगोलकेन्द्रपृष्ठकेन्द्र-परिभाषाः।
- भूगोलस्वरूपम्।

- स्वस्थान-खस्वस्तिक-ध्रुवस्थानपरिचयः।
- याम्योत्तर-क्षितिज-समस्थान-पूर्वापर-कोणवृत्त-नाडीवृत्तपरिभाषाः।
- निरक्षदेश-रेखावृत्त-रेखादेश-उन्मण्डल-कदम्बवृत्त-क्रान्तिवृत्त-गोलसन्धि-अयनवृत्तपरिभाषाः च।

अन्वितिः २. विमण्डलादीनां परिभाषाःच। **श्रेयोऽङ्कः १**

- विमण्डल-दृङ्मण्डल-उन्नतांश-शङ्कु-दृग्ज्या-दिगंशपरिभाषाः।
- लग्नादिस्वरूपं।
- वित्रिभलग्नम्।
- दृक्षेपदृग्गती।
- अग्रा-क्रान्त्यक्षांशलम्बांश-ग्रहस्थान-शरपरिभाषाः उपवृत्त-भुज-कोटिपरिभाषाः।
- चर-उदयमान-दृग्लम्बन-स्फुटलम्बन-नतिपरिभाषाः।
- हृति-तद्धृति-इष्टहृति-अन्त्यापरिभाषाः।
- वृत्त-चाप-ज्या-कुज्या-स्पर्श-कोटिस्पर्श-छेदन-कोटिच्छेदनरेखापरिभाषाः च।

अन्वितिः ३. रेखागणितम् (षष्ठोऽध्यायः) १-१७ प्रतिज्ञाः। **श्रेयोऽङ्कः १**

- समानलम्बत्रिभुजक्षेत्राणां समानकोणत्रिभुजक्षेत्राणां च निष्पत्तिः।
- एकरूपनिष्पत्तिः च।

अन्वितिः ४. रेखागणितम् (षष्ठोऽध्यायः) १८-३० प्रतिज्ञाः। **श्रेयोऽङ्कः १**

- सजातीययोः त्रिभुजयोः एकरूपनिष्पत्तिः।
- सजातीयक्षेत्राणां मिथः साजात्यम्।
- समानान्तरचतुर्भुज-क्षेत्रविचारः।
- भुजकोटिवर्गयोगमूलं कर्णः चेति।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Jagannātha (Author), Kamalaśaṅkara (Ed.). (1901). Rekhāgaṇitam. Mumbai : Nirṇaya Sāgara Press.
2. Paṇ. Sītārāmajhā (Ed.). Golaparibhāṣā.

सहायकाः ग्रन्थाः (Additional Readings)

1. Ācārya Haṃsadara Jhākṛtā. Golaparibhāṣā.
2. Upādhyāya, Kāmeśvara. (2014). Golaparibhāṣā. Varanasi : Choukhamba Prakāśana.
3. Sharma, G. L. (Ed.). (2006). Rekhāgaṇitam. Jaipur : Hansa Prakāśana.

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

प्रधानः पाठ्यक्रमः (Major) 1.4: व्यक्तगणितप्रपञ्चः (परिकर्माणि मिश्रव्यवहारः श्रेढीव्यवहारश्च सोपपत्तिकः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. काल-भारप्रभृतिविषयकभारतीयप्राचीनपरिभाषायाः, संख्यास्थानादीनां च अवबोधनम्।
2. सङ्कलन-व्यवकलन-गुणन-भजनविधीनां सोदाहरणं सोपपत्तिज्ञानम्।
3. वर्ग-वर्गमूल-घन-घनमूलगणितानां सोदाहरणं सोपपत्तिज्ञानम्।
4. मिश्रकर्मगणितस्य, इष्टकर्मगणितस्य, सङ्क्रमणगणितस्य तथा त्रैराशिकगणितस्य व्यस्तत्रैराशिकगणितस्य पाञ्चराशिकादिगणितस्य उदाहरणसहितं सोपपत्ति अध्ययनम्।
5. भाण्डप्रतिभाण्डकगणिताध्ययनम्।
6. मिश्रव्यवहारे मूलधन-कलान्तर-मिश्रान्तरज्ञानम्।
7. क्रयविक्रय-रत्नमूल्य-सुवर्णादिव्यवहारगणितस्य छन्दोव्यवहारगणितस्य च अध्ययनम्।
8. श्रेढ़ीव्यवहारगणितस्य विस्तृतमध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. सङ्कलन-व्यवकलन-वर्ग-वर्गमूल-घन-घनमूलादिविशिष्टगणितानां सिद्धान्तानां वर्णयितुं शक्ष्यन्ति।
2. इष्टकर्म-मिश्रकर्म-वर्गकर्म-गुणकर्म-त्रैराशिकादीनां विश्लेषणकर्तुं समर्थाः भविष्यन्ति।
3. त्रैराशिकगणितं विज्ञाय तस्य प्रयोगं लौकिकव्यवहारगणिते ग्रहगणिते च भूरिशः कर्तुं समर्थाः भविष्यन्ति।
4. श्रेढीगणित-प्रपञ्चे बुद्धिवैशद्यं प्राप्य समस्यापरिहारे निपुणाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	व्यक्तगणितप्रपञ्चः (परिकर्माणि मिश्रव्यवहारः श्रेढीव्यवहारश्च सोपपत्तिकः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. परिकर्माणि - १ **श्रेयोऽङ्कः १**

- अभिन्नपरिकर्माष्टकम् (सङ्कलन-व्यवकलन-गुणन-भजन-वर्ग-वर्गमूल-घन-घनमूलानाम् आनयनक्रमः)

अन्वितिः २. परिकर्माणि - २ **श्रेयोऽङ्कः १**

- भिन्न-शून्यपरिकर्माष्टके जातिचतुष्टय-व्यस्तविधि-इष्टकर्म-मिश्रकर्म-वर्गकर्म-गुणकर्म-त्रैराशिकादि-भाण्डप्रतिभाण्डगणितानि।

अन्वितिः ३. मिश्रव्यवहारः। **श्रेयोऽङ्कः १**

- मूलकलान्तरे।
- मिश्रान्तरम्।
- वापीपरिपूर्तिकालः।
- क्रयविक्रयौ।
- रत्नमिश्रीकरणम्।
- सुवर्णगणितम्।
- छन्दश्चितिः।

अन्वितिः ४. श्रेढीव्यवहारः। **श्रेयोऽङ्कः १**

- श्रेढीस्वरूपम्।
- सङ्कलितम्।
- सङ्कलितैक्यम्।
- वर्गघनैक्ये मध्यधन-अन्त्यधन-सर्वधनानयनगणितम्।
- गुणोत्तरश्रेढी।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Līlāvatī. (1931). (G. P. Dwivedi, Ed.). Lucknow : Newul Kishor Printing Press.
2. Nārayana Paṇḍita (Author), G. Kavirāj & P. Dwivedi (Eds.). (1936). Gaṇitakaumudī. Banaras : Tara Printing Works.

सहायकाः ग्रन्थाः (Additional Readings)

1. MahāVīrācārya (Author). (1912). Gaṇitasārasaṅgrahaḥ. (M. Rangacharya, Ed.). Madras : Superintendent Govt. Press.
2. MahāVīrācārya (Author). (1963). Gaṇitasārasaṅgrahaḥ. (L. C. Jain, Ed.). Sholapur : Jaina Saṃskṛti Saṃrakṣaka Saṃgha.
3. Līlāvatī (Kriyākramakarīvyākhyopetā). (1975). (K. V. Sarma, Ed.). Hoshiarpur : Viśeṣānanda Vaidika Śodha Sansthān.
4. Āryabhaṭīyam. (1976). (K. S. Shukla & K. V. Sharma, Eds.). Delhi : INSA.
5. Śrīdharaācārya (Author). (2004). Triśatikā. Delhi: R. S. Sansthān.

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.5: ग्रहस्पष्टीकरणम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. चतुर्विंशतेः ज्याखण्डानां साधनम्।
2. इष्टचापस्य ज्यासाधनं तथा इष्टज्यातः चापसाधनस्य परिज्ञानम्।
3. केन्द्रानयनं, भुजकोटिज्यासाधनस्य, मन्दफल-शीघ्रफलादिसाधनस्य च अवबोधनम्।
4. शीघ्रमन्दफलयोः धनर्णत्वस्य, भुजान्तरसंस्कारस्य, वक्रारम्भे वक्रत्यागे च केन्द्रांशपरिज्ञानम्।
5. शरानयनं, ग्रहाणां स्फुटसावनदिनमानज्ञानं, चरसंस्कारः, तिथ्यादिसाधनम् इत्येतेषां परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्राचीनभारते ग्रहस्फुटीकरणस्य क्रमान् ज्ञात्वा अन्येभ्यः प्रतिपादयितुं सामर्थ्यं प्राप्स्यन्ति।
2. इष्टक्रान्त्यादीसाधनानां वर्णनं कर्तुं शक्ष्यन्ति।
3. ज्यासारिणीवशात् भुज-कोटि-उत्क्रमज्याः साधयितुं तासां चापानि चानेतुं सक्षमाः भविष्यन्ति।
4. देशान्तर-भुजान्तर-उदयान्तरसंस्काराणां सोपपत्ति ज्ञानमवाप्स्यन्ति।
5. रविचन्द्रयोः स्फुटाभ्यां तिथि-योग-करण-नक्षत्राणां साधनं स्वयं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.5	ग्रहस्पष्टीकरणम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ग्रहस्पष्टीकरणोपकरणानि। **श्रेयोऽङ्कः १**

- ग्रहस्पष्टीकरणस्य प्रयोजनम्।
- ग्रहगतौ शीघ्रोच्चमन्दोच्चपातानां कारणत्वम्।
- मध्यमग्रहानयनम्, ग्रहाणामष्टधागतिः।
- चतुर्विंशतिज्याखण्डानि।
- चापतः ज्यासाधनम्।
- ज्यातः चापसाधनं च।

अन्वितिः २. इष्टक्रान्त्यादिसाधनम्। **श्रेयोऽङ्कः १**

- इष्टक्रान्तिसाधनम्।
- केन्द्रानयनम्।
- भुजज्याकोटिज्यासाधनम्।
- ग्रहाणां मन्दपरिध्यंशाः।
- मन्दफलसाधनम्।
- भौमादीनां शीघ्रपरिध्यंशाः।
- इष्टपरिध्यंशज्ञानम्।
- शीघ्रकर्णानयनम्।
- शीघ्रफलसाधनम्।

अन्वितिः ३. ग्रहेषु संस्काराः। **श्रेयोऽङ्कः १**

- ग्रहाणां स्फुटीकरणार्थं संस्काराः।
- शीघ्रमन्दकर्मणोः धनर्णत्वम्।
- देशान्तर-भुजान्तरसंस्कार-उदयान्तरसंस्काराः।
- वक्रारम्भ-वक्रत्यागे केन्द्रांशाः।
- मार्गारम्भकेन्द्रांशेषु हेतुः च।

अन्वितिः ४. स्फुटशरादिसाधनम्। **श्रेयोऽङ्कः १**

- शरानयनम्।
- क्रान्तिशरसंस्कारेण स्पष्टक्रान्तिज्ञानम्।
- ग्रहाणां स्फुटसावनदिनमानम्।
- क्रान्तिज्या-द्युज्या-चरज्यासाधनम्।
- दिनरात्रिमानज्ञानम्।
- तिथ्यादिकरणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Sūryasiddhāntaḥ (Tattvāmṛtavyākhyopetaḥ). (1946). (K. Shastri, Ed.). Banaras : Choukhamba Sanskrit Series Office.
2. Siddhāntaśiromaṇiḥ (Vāsanābhāṣyopetaḥ). (2005). (B. Shastri, Ed.). Choukhamba Sanskrit Sansthan.

3. Sūryasiddhāntaḥ (Gūḍhārthaprakāśikāvyākhyopetaḥ). (2016). (R. Pandey, Ed.). New Delhi : Choukhamba Surabharati Prakāśan.

सहायकाः ग्रन्थाः (Additional Readings)

1. Brāhmasphuṭasiddhāntaḥ. (1966). (R. Sharma, Ed.). New Delhi : Indian Institute of Astronomical & Sanskrit Research.
2. Siddhāntatattvavivekaḥ. (1966). (K. Dwivedi, Ed.). Varanasi : Sampūrṇānanda Sanskrit Viśvavidyālay.
3. Āryabhaṭīyam. (1976). (K. S. Shukla & K. V. Sarma, Eds.). Delhi : INSA.
4. Siddhāntadarpaṇaḥ. (1996). (A. K. Upadhyay, Ed.). Delhi : Nāg Prakāśan.
5. Siddhāntaśekharaḥ. (2012). (A. Sripada Bhat, Ed.). Delhi : INSA.

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.6: व्यक्तगणिते क्षेत्रादिव्यवहाराः (सोपपत्तिकाः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. त्रिभुज-चतुर्भुज-वृत्त-सूचीक्षेत्राणां फलाद्यानयनप्रकारज्ञानम्।
2. खात-चिति-क्रकच-राशि-छायाव्यवहाराणां गणितीयप्रक्रियाणाम् अवगमनम्।
3. अङ्कपाशः (Permutation of Digits) इत्यस्य गणितविशेषस्य ज्ञानप्रापणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. त्रिभुजे समकोण-विषमकोणादिभेदानां स्वरूपम् अधिगन्तुं समर्थाः भविष्यन्ति।
2. सूचीक्षेत्रादीनां फलानयनक्रमं सोपपत्ति प्रतिपादयितुं सामर्थ्यं प्राप्स्यन्ति।
3. खात-चिति-क्रकच-राशिव्यवहाराणाम् अवधारणां स्पष्टकर्तुं शक्ष्यन्ति।
4. छायाव्यवहारमधीत्य तत्रत्यसूत्राणां ग्रहगणिते उपयोगं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.6	व्यक्तगणिते क्षेत्रादिव्यवहाराः (सोपपत्तिकाः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. त्रिभुज-चतुर्भुजक्षेत्रलक्षणम्। **श्रेयोऽङ्कः १**

- त्रिभुजे भुजकोट्याद्यानयनम्।
- आसन्नमूलानयनम्।
- इष्टकर्णाद्यानयनम्।
- कर्णकोटियोगे भुजे ज्ञाते च पृथक्करणम्।
- भुजकर्णयोगे कोटिज्ञाते च पृथक्करणम्।
- कोटिकर्णान्तरे भुजे ज्ञाते च पृथक्करणम्।
- कोटिकर्णयुते भुजे ज्ञाते च पृथक्करणम्।
- भुजकोटियोगे कर्णे ज्ञाते च पृथक्करणम्।

- लम्बाबाधानयनम्।
- अक्षेत्रलक्षणम्।
- त्रिभुजफलानयनम्।
- समचतुर्भुजायतयोः फलानयनम्।
- लम्बानयनम्।
- लम्बे ज्ञाते कर्णानयनम्।
- द्वितीयकर्णानयनम्।
- कर्णकल्पने विशेषः।
- चतुर्भुजफलानयनम्।
- समानलम्बचतुर्भुजफलानयनम्।
- अनुशिक्षणम्।

अन्वितिः २. सूची-वृत्तव्यवहारौ। **श्रेयोऽङ्कः १**

- सूचीक्षेत्रलक्षणम्।
- सूचीक्षेत्रे सन्धिपीठानयनम्।
- सूचीक्षेत्रे अधःखण्डानयनम्।
- सूचीक्षेत्रे कर्णयोगाल्लम्बभुजानयनम्।
- सूच्याबाधा।
- सूचीक्षेत्रे लम्बभुजानयनम्।
- वृत्ते व्यास-परिधिज्ञानम्।
- वृत्त-गोल-फलानयनम्।
- शरजीवादिज्ञानम्।
- वृत्तान्तस्त्रिभुजाद्यानयनम्।
- जीवानयनम्।
- चापानयनम्।
- अनुशिक्षणम्।

अन्वितिः ३. खात-चिति-क्रकच-राशिव्यवहाराः। **श्रेयोऽङ्कः १**

- खातदैर्घ्यविस्तृतिज्ञानम्।

- खातघनफलानयनम्।
- इष्टिकाप्रमाणम्।
- चितौ इष्टिकासंख्यादिज्ञानम्।
- क्रकचव्यवहारः।
- राशिव्यवहारपरिचयः।
- धान्यादीनां व्यवहारप्रकारः।
- धान्यप्रमाणज्ञानम्।
- अनुशिक्षणम्।

अन्वितिः ४. छायाव्यवहारः कुट्टकः अङ्कपाशश्च। **श्रेयोऽङ्कः १**

- छायाव्यवहारस्वरूपम्।
- छायान्तरानयनप्रकाराः।
- दीपोच्च्यानयनम्।
- छायोच्छ्रितिः।
- दीपशङ्कुतलान्तरज्ञानम्।
- छायाग्रदीपान्तरज्ञानम्।
- कुट्टकोपयोगिता।
- कुट्टकप्रकारः तत्र निरग्रकुट्टकः।
- अङ्कपाशस्वरूपम्।
- अङ्कपाशप्रकाराः।
- निर्दिष्टाङ्कैः संख्याभेदाः।
- विशेषाङ्कपाशविधिः।
- अनियत-अतुल्याङ्कभेदानयनम्।
- नियतेऽङ्कयोगे भेदाः।
- अनुशिक्षणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Līlāvatī (Vyākhyā: Prof. Rāmacandra Pāṇḍeya).

सहायकाः ग्रन्थाः (Additional Readings)

1. Gaṇitakaumudī, Nārayana Paṇḍita.

द्वितीयवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

तृतीयसत्रार्द्धः (Semester - 3)

प्रधानः पाठ्यक्रमः (Major) 2.1: त्रिकोणमितिगणितम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. त्रिकोणमितेः परिचयप्राप्तिः, तद्भेदानां च अध्ययनम्।
2. ज्यादीनां परिभाषाज्ञानम्, त्रिभुजस्य अवयवानां च अध्ययनम्।
3. वृत्तान्तर्लग्न-बहिर्लग्नसमानबहुभुजक्षेत्रस्य परिधिफलादीनामानयनक्रस्य अध्ययनम्।
4. जात्य-अजात्यत्र्यस्रक्षेत्रयोः सम्बन्धिनां साध्यानाम् अवगमनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. सरलत्रिकोणमिति-चापीयत्रिकोणमिति-रेखागणित-गोलीयरेखागणितानां परस्पराश्रयत्वम् अधिगन्तुं समर्थाः भविष्यन्ति।
2. त्रिकोणमितिक्षेत्रे भारतीयानां सूक्ष्मदृष्टेः अध्ययनं कृत्वा तान् अंशान् लोके जनेभ्यः प्रसारयितुं शक्ताः भविष्यन्ति।
3. ज्याकोटिज्यादीनां परस्परसम्बन्धानां अवधारणां स्पष्टकर्तुं शक्ष्यन्ति।
4. ज्या-कोटिज्या-स्पर्श-कोटिस्पर्श-छेदन-कोटिच्छेदन-उत्क्रमज्या-कोट्युत्क्रमज्यानां त्रैकोणमितिकानाम् अष्टपदार्थानां प्रस्तोतुं समर्थाः भविष्यन्ति।
5. जात्य-अजात्यत्र्यस्रक्षेत्रयोः सम्बन्धिनां व्याख्यातुं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	त्रिकोणमितिगणितम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सरलत्रिकोणमितेः (प्रथमाध्यायः) **श्रेयोऽङ्कः १**

- सरलत्रिकोणमितिबोधकपरिभाषाः।
- जीवादीनां परिभाषाः।
- ज्यादीनां धनर्णता।

- पादान्तेषु ज्यादीनां त्रिज्यासापेक्षमङ्कात्मकमानानि।
- सरलचापीयत्रैकोणमितिकसम्बन्धाः।
- सरलत्रिकोणमिते अष्टावयवानां परस्परसम्बन्धाः।
- अभ्यासप्रश्नानां साधनम्।
- अनुशिक्षणम्।

अन्वितिः २. सरलत्रिकोणमितेः (द्वितीयाध्यायः) **श्रेयोऽङ्कः १**

- कोणानां योगान्तरकोटिज्यासाधनम्।
- ज्यादिसम्बन्धियोगान्तरगुणनफलानां मानानि।
- अर्धांशज्याकोटिज्यानयनम्।
- ज्यादिमानानां कोटिज्ययोः स्वरूपान्तरम्।
- ज्यादीनां मानानां वैचित्र्यम्।
- निर्दिष्टांशानां ज्याकोटिज्यानयनम्।
- कोणीयज्यादीनां सारण्युत्पादनप्रकारः।
- 15, 30, 45, 60, 90 अंशानां ज्याकोटिज्यानयनम्।
- द्वितीयाध्यायस्य अवशिष्टविषयाः।
- द्वितीयाध्यायसम्बन्धिनः सोत्तराः प्रश्नाः।
- अनुशिक्षणम्।

अन्वितिः ३. सरलत्रिकोणमितेः (तृतीयाध्यायः) **श्रेयोऽङ्कः १**

- त्रिभुजस्य अवयवाः।
- प्रतित्रिभुजं तत्तद्भुजा तत्तत्सम्मुखकोणज्यासमानगुणप्रदर्शनम्।
- त्रिभुजे भुजेभ्यः इष्टकोणकोटिज्यानयनयुक्तिप्रकारः।
- त्रिभुजे भुजेभ्यः अभीष्टकोणज्यानयनयुक्तिप्रकारः।
- त्रिभुजे भुजत्रयज्ञानद्वारा इष्टकोणार्धज्याकोटिज्यास्पर्शरेखानां मानप्रदर्शनम्।
- त्रिभुजे भुजेभ्यः क्षेत्रफलानयनयुक्तिप्रकारः।
- त्रिभुजस्य भुजेभ्यस्तदन्तर्बहिर्लग्नयोर्वृत्तयोर्व्यासार्द्धानयनप्रकारः।
- वृत्तान्तर्गतचतुर्भुजस्य मुजेभ्यस्तत्कोणकर्णफलादीनामानयनप्रकारः।
- विषमचतुर्भुजमात्रस्यान्योन्यसम्मुखकोणद्वयविशिष्टेभ्यो भुजेभ्यः फलानयनप्रकारः।

- वृत्तान्तर्गतस्य समानर्जुबहुभुजक्षेत्रस्य परिधिफलयोरानयनप्रकारः।
- वृत्तवहिर्लग्नस्य ऋजुसमबहुभुजक्षेत्रस्य परिधिफलयोरानयनप्रकारः।
- वृत्तक्षेत्रस्य परिधिफलयोरानयनप्रकारः।
- 'पाई' इत्यस्यमानानयनप्रकारः।
- कोणस्य चापीयमानानयन प्रकारः।
- तृतीयाध्यायसन्बन्धिनः सोत्तराः प्रश्नाः।
- अनुशिक्षणम्।

अन्वितिः ४. सरलत्रिकोणमितेः (चतुर्थाध्यायः) **श्रेयोऽङ्कः १**

- त्रिभुजगणितम्।
- जात्यत्रिभुजगणितम्।
- अजात्यत्र्यस्र्यगणितम्।
- अभ्यासार्थमुदाहरणानि।
- त्रिकोणमिते वंशगृह पर्वतादीनामौच्च्यस्य वस्त्वन्तरस्य च ज्ञानोपायः।
- चतुर्थाध्यायसम्बन्धिनः प्रश्नाः तथा चोत्तराः।
- प्रक्रमोक्तप्रश्नोत्तराणि।
- प्रक्रमोक्तद्विगुणकोणस्य ज्यादिस्वरूपाणां वैशम्यम्।
- घातमापाङ्काः (लघुरिक्थगणितस्य परिचयः)
- लघुरिक्थस्य संख्याज्ञानविधिः।
- ज्यादिकस्य चापानयनप्रकारः।
- कस्यचित् सूक्ष्मचापस्य ज्यास्पर्शरेखाज्ञानस्य प्रकारः।
- अभीष्टज्यास्पर्शरेखाणां सूक्ष्मचापज्ञानविधिः।
- घातमापकषड्विधम्।
- सूर्यकेन्द्रीयग्रहस्य भूकेन्द्रीयग्रहे परिणमनम्।
- अनुशिक्षणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Saralatrikoṇamitiḥ, Baladeva Upādhyāya.

सहायकाः ग्रन्थाः (Additional Readings)

1. Saralatrikoṇamitiḥ, Bāpūdeva Śāstrī.

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: अव्यक्तगणितप्रपञ्चः (सोपपत्तिकः)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अव्यक्तगणितस्य ग्रहगणितोपयोगिताज्ञानप्राप्तिः।
2. अवर्गाङ्कभूतस्य करणीगणितस्य अध्ययनम्।
3. कुट्टक-वर्गप्रकृति-चक्रवालगणितविशेषाणाम् अवगमनम्।
4. एकवर्ण-अनेकवर्णसमीकरणयोः विशिष्टांशानां परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. सर्वस्यापि व्यक्तगणितस्य मूलम् अव्यक्तगणितमेव इति प्रतिपादयितुं समर्थाः भविष्यन्ति।
2. अनन्तपरिभाषां (Infinity) विज्ञाय तद्विषये पाश्चात्त्यानां मतानि बोधयितुं प्रबुद्धाः भविष्यन्ति।
3. अवर्गाङ्कानां संकलन-व्यवकलन-गुणन-भजन-वर्ग-वर्गमूलगणितं कर्तुं पटवः भविष्यन्ति।
4. कुट्टक-स्थिरकुट्टक-संश्लिष्टकुट्टकानां प्रक्रियामधिगम्य व्यावहारिकगणिते ग्रहगणिते च तस्य उपयोगं कर्तुं सक्षमाः भविष्यन्ति।
5. एकवर्णसमीकरणस्य अनेकवर्णसमीकरणस्य च विषये भारतीयगणितपरम्परां विस्तारयितुं शक्ताः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	अव्यक्तगणितप्रपञ्चः (सोपपत्तिकः)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. अव्यक्तपरिचयः अनन्तकल्पना च। **श्रेयोऽङ्कः १**

- व्यक्ताव्यक्तयोः भेदः।
- अव्यक्तस्य वैशिष्ट्यम्।
- अव्यक्तकल्पनाप्रकारः।
- अव्यक्तषड्विधस्य उपपत्तिः।

- खषड्विधोपपत्तिः।
- अनन्तराशिस्वरूपं।

अन्वितिः २. करणीषड्विधम्। **श्रेयोऽङ्कः १**

- करणीपरिभाषा।
- करण्याः स्वरूपं वैशिष्ट्यं च।
- प्रकारत्रयेण द्वयोः करण्योः योगान्तरम्।
- करण्योः गुणनभजने।
- करणीभागाहारे विशेषविधिः।
- करणीविश्लेषः।
- करणीवर्गः।
- करणीवर्गमूलम्।
- सदसत्करणीविचारः।

अन्वितिः ३. कुट्टकः वर्गप्रकृतिः चक्रवालं च। **श्रेयोऽङ्कः १**

- स्थिरकुट्टकस्वरूपम्।
- ग्रहगणिते कुट्टकोपयोगः विकलाशेषतो ग्रहानयनम्।
- संश्लिष्टकुट्टकस्वरूपम्।
- शुद्धिज्ञानम्।
- लब्धिगुणानयनम्।
- गुणलब्ध्योरनेकत्वम्।
- वर्गप्रकृतिचक्रवालयोः विशेषांशाः च।

अन्वितिः ४. समीकरणम्। **श्रेयोऽङ्कः १**

- एकवर्णसमीकरणे बीजं तत्र द्वयोः पक्षयोः समत्वसम्पादनञ्च।
- कलान्तरादीनामानयनक्रमः।
- त्र्यस्रक्षेत्रप्रश्नानां समाधानम्।
- अव्यक्तवर्गादिसमीकरणम्।
- अनेकवर्णसमीकरणम्।

- मध्यमाहरणम्।
- भावितम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Bhāskarīyabījagaṇitam (Kṛṣṇadaivajñaviracitanavāṅkuravyākhyāsahitam). (1930). (D. Apte, Ed.). Pune : Anandāśrama Press.
2. Bhāskarīyabījabhāṣyam (Sūryadāsaviracitam). (2001). Vadodara : Gaekwad's Oriental Series.
3. Bījagaṇitam (Bhāskarācāryaviracitam). (2012). (A. Jha, Ed.). Varanasi : Choukhamba Prakāśana.
4. Bījagaṇitāvataṃsaḥ (Nārayana Paṇḍitakṛtaḥ). (2019). (V. D. Heroor, Ed.). Ramtek : KKSU.

सहायकाः ग्रन्थाः (Additional Readings)

1. Bhāskarīyabījagaṇitam (Kṛṣṇagaṇakaviracitabījapallavasahitam). (1958). (T. V. Radhakrishna Shastri, Ed.). Tanjore : TMSSM Library.
2. Līlāvatī (Kriyākramakarīvyākhyopetā). (1975). (K. V. Sarma, Ed.). Hoshiarpur : Viśeṣānanda Vaidika Śodha Sansthān.
3. Gaṇitasārasaṅgrahaḥ (Mahāvīrācāryakṛtā). (1912). (M. Rangacharya, Ed.). Madras : Superintendent Govt. Press.
4. Triśatikā (Śrīdharaācāryaviracitā). (2004). Delhi : R. S. Sansthān.

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: त्रिप्रश्नविषयाः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. शङ्कुच्छायावशात् दिशः देशस्य कालस्य च आनयनविधेः ज्ञानम्।
2. छायातः कर्णस्य, कर्णात् छायायाः च ज्ञानेन समकोणत्रिभुजे भुजकोटिकर्णनियमज्ञानम्।
3. पलभातः अक्षांशलम्बांशयोः, मध्याह्नच्छायातः रवेः, अयनांशस्य च अवबोधनम्।
4. अग्रा-कर्णवृत्ताग्रा-समवृत्तीयार्कच्छायातः शंकु-दृग्ज्यादिसाधनक्रमस्य अध्ययनम्।
5. छायातः नतकालज्ञानम्, नतकालात् छायानयनम्, छायाभ्रमणमार्गज्ञानम्, निरक्षे साक्षे च राश्युदयसाधनस्य ततो लग्नानयनगणितस्य च सोपपत्ति अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयपरम्परानुगुणं दिग्देशकालानां सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।
2. देशज्ञानप्रकाराणां वर्णनं कर्तुं शक्ष्यन्ति।
3. अग्रायाणां कर्णवृत्ताग्रायाणाञ्च साधनादि विश्लेषणकर्तुं समर्थाः भविष्यन्ति।
4. शंकु-दृग्ज्यादिसाधनक्रमाणां अवधारणां स्पष्टकर्तुं शक्ष्यन्ति।
5. अक्षांश-क्रान्त्यंश-नतांशानां पारस्परिकं सम्बन्धं प्रतिपादयितुं कुशलाः भविष्यन्ति।
6. भगणाद्युपकरणानि विहाय ग्रहच्छायावशात् एव स्फुटग्रहसाधने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	त्रिप्रश्नविषयाः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. दिक्साधनक्रमः। **श्रेयोऽङ्कः १**

- दिग्ज्ञानम्।
- अयनांशसाधनम्।
- छायातः कर्णज्ञानम्।

- कर्णतः छायाज्ञानम्।

अन्वितिः २. देशज्ञानप्रकारः। **श्रेयोऽङ्कः १**

- पलभासाधनम् अक्षांशलम्बांशसाधनम्।
- मध्याह्नच्छायया रविज्ञानम्।
- मध्यनतांशात् छायाकर्णयोः आनयनं च।

अन्वितिः ३. अग्रादिसाधनम्। **श्रेयोऽङ्कः १**

- अग्रायाः कर्णवृत्ताग्रायाश्च साधनम्।
- समवृत्तस्यार्कस्य छायाद्यानयनम्।
- अग्रावशात् कोणशंकुसाधनम्।
- दृग्ज्याच्छायाकर्णयोः आनयनं च।

अन्वितिः ४. कालसाधनम्। **श्रेयोऽङ्कः १**

- छायातो नतकालज्ञानम्।
- छायाभ्रमणमार्गज्ञानम्।
- निरक्षे राश्युदयासुसाधनम्।
- स्वदेशोदयसाधनम्।
- लग्नानयनञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Siddhāntaśiromaṇiḥ (Vāsanābhāṣyopetaḥ). (2005). (Bāpūdeva Śāstrī, Ed.). Varanasi : Chaukhamba Sanskrit Sansthān.
2. Sūryasiddhāntaḥ (Tattvāmṛtavyākhyopetaḥ). (2015). (Kapileśvara Śāstrī, Ed.). Varanasi : Chaukhamba Sanskrit Bhavan.

सहायकाः ग्रन्थाः (Additional Readings)

1. Brāhmasphuṭasiddhāntaḥ. (1966). (Rāmasvarūpa Śarmā, Ed.). New Delhi : Indian Institute of Astronomical & Sanskrit Research.
2. Siddhāntatattvavivekaḥ. (1966). (Kṛṣṇacandra Dvivedī, Ed.). Varanasi : Sampūrṇānanda Saṃskṛta Viśvavidyālaya.
3. Āryabhaṭīyam. (1976). (K. S. Śukla & K. V. Śarmā, Eds.). Delhi : INSA.
4. Siddhāntadarpaṇaḥ. (1996). (Aruṇa Kumāra Upādhyāya, Ed.). Delhi : Nāg Prakāśan.
5. Siddhāntaśekharaḥ. (2012). (A. Sripāda Bhaṭ, Ed.). Delhi : INSA.

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

चतुर्थसत्रार्द्धः (Semester - 4)

प्रधानः पाठ्यक्रमः (Major) 2.4: करणरीत्या ग्रहादिसाधनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. कालानुगुणं गणितशास्त्रीयविधीनामवगमनम्, करणगणितस्य प्रमुखविधीनां च परिचयप्रदानम्।
2. ग्रहलाघवोक्तपद्धत्या ग्रहस्पष्टीकरणस्य ज्ञानप्रदानम्।
3. लाघवेन अहर्गणादिगणितप्रक्रियायाः अवगमनम्।
4. लघुना उपायेन पञ्चाङ्गनिर्माणोपयोगिगणितस्य अध्ययनम्।
5. ज्योतिश्शास्त्रस्य विविधविधीनां निरूपणे सामर्थ्यप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. करणगणितस्य प्रमुखविधीनां सामान्यवर्णनं कर्तुं समर्थाः भविष्यन्ति।
2. सूर्यचन्द्रयोः स्पष्टीकरणं पञ्चाङ्गगणितञ्च व्याख्यातुं शक्ताः भविष्यन्ति।
3. भौमादीनां अवधारणां स्पष्टकर्तुं शक्ष्यन्ति।
4. केरले विकसितस्य प्रश्नवर्त्मनो विशेषतां ज्ञास्यन्ति।
5. अष्टमङ्गलप्रश्नविधेः सूक्ष्मतया अध्ययनं करिष्यन्ति।
6. दैवज्ञेन ज्ञातव्यानां समयादीनां पञ्चदशानाम् अंशानां यथाविधि बोधं प्राप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.4	करणरीत्या ग्रहादिसाधनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मध्यमग्रहाद्यानयनम्। **श्रेयोऽङ्कः १**

- करणप्रयोजनम्।
- अहर्गणसाधनम्।
- क्षेपकाः।
- ध्रुवाः।
- अहर्गणोत्पन्नमध्यमग्रहः।
- अहर्गणोत्पन्नमध्यमग्रहे ध्रुव-क्षेपकसंस्कारः।
- सूर्यादीनां मध्यमानयनम्।
- उच्चपातादीनाम् आनयनम्।

- भौमबुधगुरूशुक्रकेन्द्रानयनम्।
- सूर्यादीनां गतयः।
- ग्रहलाघवकाले दृग्गणितैक्यग्रहप्रमाणम्।
- प्रायोगिकम्।

अन्वितिः २. सूर्यचन्द्रयोः स्पष्टीकरणं पञ्चाङ्गगणितञ्च। **श्रेयोऽङ्कः १**

- भुजकोटिसाधनम्।
- सूर्यमन्दफलानयनम्।
- चन्द्रमन्दफलानयनम्।
- पलभा-चरखण्डानि च।
- चरकालानयनम्।
- चरभुजफलसंस्कृतायनांशानयनम्।
- रविचन्द्रयोः स्फुटीकरणम्।
- रविचन्द्रयोः स्फुटाकरणे केतकरोक्तविशेषः।
- रविचन्द्रयोः गतिस्फुटीकरणम्।
- पञ्चाङ्गसाधनम्।
- प्रायोगिकम्।

अन्वितिः ३. भौमादीनां स्पष्टीकरणम्। **श्रेयोऽङ्कः १**

- भौमादीनां शीघ्राङ्काः।
- भौमादीनां शीघ्रफलानयनम्।
- भौमादीनां मन्दाङ्काः।
- भौमादीनां मन्दफलानयनम्।
- भौमादीनां स्फुटीकरणे फलसंस्कारनियमः।
- भौमादीनां मन्दस्पष्टगत्यानयनम्।
- भौमादीनां स्पष्टगत्यानयनम्।
- भौमशुक्रयोः गत्यानयने विशेषः।
- भौमादीनां वक्रमार्गकेन्द्रांशाः।
- भौमादीनाम् उदयास्तकेन्द्रांशाः।
- भौमादीनाम् उदयास्तयो दिग्ज्ञानम्।
- भौमादीनां वक्रोदयादिकालज्ञानम्।
- प्रायोगिकम्।

अन्वितिः ४. त्रिप्रश्नवासना। **श्रेयोऽङ्कः १**

- लङ्कोदयमानानि।
- स्वोदयसाधनम्।
- लग्नानयनम्।
- दिनमानसाधनम्।
- क्रान्त्यानयनम्।
- दिनार्धे नतोन्नताशज्ञानम्।
- अक्षांशलम्बांशयोरानयनम्।
- उन्नतकालादिष्टकालानयनम्।
- इष्टकालादुन्नतघट्यानयनम्।
- दिग्ज्ञानम्।
- दिगंशानयनम्।
- नलिकाबन्धविधिः।
- ग्रहणसम्भवासम्भवविचारः।
- चन्द्रग्रहणस्वरूपम्।
- भूभासाधनम्।
- शरसाधनम्।

- स्पर्शसम्मिलनमध्योन्मीलनमोक्षकालसाधनम्।
- स्पर्शसम्मिलनोन्मीलनमोक्षदिक्साधनम्।
- ग्रासानयनम्।
- स्थित्यर्धविर्दार्धयोरानयनम्।
- वलनानयनम्।
- सूर्यग्रहणस्वरूपम्।
- लम्बननत्योरानयनं संस्कारश्च।
- सूर्यग्रहणे स्थित्यर्धाद्यानयने वैशिष्टयम्।
- पातानयनम्।
- दृक्कर्मसाधनम्।
- रोहिणीशकटभेदः।
- चन्द्रशृङ्गोन्नतिसाधनम्।
- ग्रहयुतिविचारः।
- पातविचारः।
- परिलेखनिर्माणम्।
- प्रायोगिकम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Grahalāghavam, Vyākhyā: Prof. Rāmacandra Pāṇḍeya.

सहायकाः ग्रन्थाः (Additional Readings)

1. Veṅkaṭeśa Ketakaraḥ.Ketakīgrahagaṇitam.

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.5: चापीयत्रिकोणमितिः गोलीयरेखागणितञ्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. चापात्मकानां खगोलीयक्षेत्राणां परिचयप्राप्तिः।
2. चापजात्यक्षेत्राणां चापाजात्यक्षेत्राणां च परिज्ञानम्।
3. विशेषतः कोणज्या-कोणसम्मुखभुजज्या-कोणसम्मुखभुजस्पर्शज्या-कोणलग्नभुजज्या-कोणकोटिज्या-कर्णकोटिज्यादीनां परिभाषाज्ञानम्।
4. गोलीयरेखागणितस्य विशेषांशानाम् अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes) अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :–

1. चापात्मकानां खगोलीयक्षेत्राणां स्वरूपं वर्णयितुं शक्ष्यन्ति।
2. "Spherical Trigonometry" इत्ययं विषयः प्राचीनभारते कालानुक्रमं कथं विकसितः आसीत् इति सम्यक् अवगन्तुं प्रभविष्यन्ति।
3. कोणज्या-कोणसम्मुखभुजज्या-कोणसम्मुखभुजस्पर्शज्या-कोणलग्नभुजज्या-कोणकोटिज्या-कर्णकोटिज्यादीनां परिभाषाव्याख्यातुं शक्ताः भविष्यन्ति।
4. सूर्यसिद्धान्तादिषु आर्षग्रन्थेषु चापात्मकानां त्रिकोणानां विषये निरूपितानां सिद्धान्तानाम् विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।
5. गोलीयक्षेत्राणां परिचयं प्राप्य तस्मिन् विषये प्राच्यपाश्चात्त्यपद्धत्योः तुलनां विधातुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.5	चापीयत्रिकोणमितिः गोलीयरेखागणितञ्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. चापजात्यम्। **श्रेयोऽङ्कः १**

- चापजात्यलक्षणम्।
- चापजात्यसम्बन्धिनः विषयाः।
- चापजात्यसम्बन्धिन्यः परिभाषाः।
- चापजात्ये भुजादीनां परिणमनयुक्तिः।

- चापजात्ययोः साजात्यविमर्शनम्।
- प्रथमसाध्यः।
- द्वितीयसाध्यः।
- तृतीयसाध्यः।
- चतुर्थसाध्यः।
- पञ्चमसाध्यः।
- चापीयगणिते सिद्धपदार्थेभ्यः सम्पन्नाः क्रियाः।
- सिद्धावयवानां संशोधकप्रकारः।
- षष्ठसाध्यः।
- अनुशिक्षणं साध्याभ्यासश्च।

अन्वितिः २. चापाजात्यसाध्यसिद्धिः। **श्रेयोऽङ्कः १**

- चापाजात्यलक्षणम्।
- चापाजात्यसम्बन्धिनः विषयाः।
- चापाजात्यसम्बन्धिन्यः परिभाषाः।
- प्रथमसाध्यः।
- द्वितीयसाध्यः।
- द्वितीयसाध्ये सिद्धसूत्रस्य संशोधकप्रकारः।
- तृतीयसाध्यः।
- चतुर्थसाध्यः।
- पञ्चमसाध्यः।
- षष्ठसाध्यः।
- सप्तमसाध्यः।
- अष्टमसाध्यः।
- अनुशिक्षणं साध्याभ्यासम्।

अन्वितिः ३. चापाजात्येन साध्यविषयाः। **श्रेयोऽङ्कः १**

- भुजद्वयतदन्तर्गतकोणयोर्ज्ञानात् तृतीयभुजानयनम्।
- भुजत्रयज्ञानेन अभीष्टकोणानयनम्।
- भुजत्रयज्ञानात् भुजसंलग्नकोणार्धज्ञानम्।
- भुजत्रयज्ञाने भूसम्मुखकोणदलकोटीज्ञानम्।
- कोणत्रयज्ञानेन भुजत्रयज्ञानम्।
- चापीयत्रिभुजफलानयनम्।
- अनुशिक्षणं साध्याभ्यासश्च

अन्वितिः ४. गोलीयरेखागणितम्। **श्रेयोऽङ्कः १**

- गोलीयरेखागणितसम्बन्धिन्यः परिभाषाः।
- गोलज्ञानपुनरावृत्तिः।
- क्षेत्राणां सिद्धिः।

- अनुशिक्षणं साध्याभ्यासश्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Golīyarekāgaṇitam. (2002). (Bhāskara Śarmā, Ed.). Jaipur : Hansa Prakāśan.
2. Jhā, Nīlāmbara. (2017). Cāpīyatrikoṇamitiḥ (Lashanlāla Jhā, Ed.). Varanasi : Chaukhambha Surabhāratī Prakāśan.

सहायकाः ग्रन्थाः (Additional Readings)

1. Siddhāntaśiromaṇiḥ (Jyopapattiviṣayakaḥ bhāgaḥ).
2. Siddhāntatattvavivekaḥ (Jyopapattiviṣayakaḥ bhāgaḥ).

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.6: ग्रहणविषयाः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. सूर्यचन्द्रयोः कक्षाव्यासार्धविषयकस्य, रविचन्द्रभूभाबिम्बप्रमाणविषकस्य च ज्ञानप्रदानम्।
2. ग्रास-स्थित्यर्ध-विमर्दार्धसाधनम्।
3. चन्द्रग्रहणे स्पर्शादिकालानयनम्।
4. वलनसाधनं, शरादीनां अङ्गुलात्मककरणस्य च अवबोधनम्।
5. सूर्यग्रहणे नति-लम्बनरूपवैशिष्ट्यस्य, तत्संस्कृततिथ्यन्तकालशरयोः, स्पर्शमोक्षकालस्य च ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ग्रहणगणितस्य उपकरणानि संसाध्य ग्रहणं कदा कथं च सम्भवतीति गणयितुं समर्थाः भविष्यन्ति।
2. रविचन्द्रग्रहणयोः भेदानां प्रतिपादने कुशलाः भविष्यन्ति।
3. स्थित्यर्धविमर्दार्धाभ्यां स्पर्शादिकालानयनं कर्तुं पटवः भविष्यन्ति।
4. सूर्यग्रहणे गर्भीयदर्शान्तः पृष्ठीयदर्शान्तः (दृग्दर्शान्तः) च कुतः भिद्यते इति प्रतिपादयितुं सक्षमाः भविष्यन्ति।
5. नतिलम्बनाभ्यां सूर्यग्रहणगणितं कथं क्लिष्टतरं भवतीति अन्यान् अवगमयितुं समर्थाः भविष्यन्ति।
6. पूर्वसाधितरविचन्द्रस्फुटाभ्यां ग्रहणयोः कालं परीक्ष्य व्यभिचारे सति बीजसंस्कारादीनां करणे हेतुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.6	ग्रहणविषयाः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ग्रहणोपकरणानि। **श्रेयोऽङ्कः १**

- सूर्यचन्द्रयोः कक्षाव्यासार्धकथनम्।
- योजनात्मककर्णस्य स्फुटीकरणार्थं कलाकर्णज्ञानम्।
- रविचन्द्रयोः बिम्बप्रमाणम्।

- भूभाबिम्बसाधनम्।
- ग्रहणे राहोः कारणत्वविमर्शः च।
- पर्वसम्भावना।

अन्वितिः २. ग्रहणसम्भवादिज्ञानम्। **श्रेयोऽङ्कः १**

- मध्यग्रहणकालिकग्रासमानानयनम्।
- इष्टकाले ग्रासानयनम्।
- ग्रासादिष्टकालानयनम्।
- स्थितिविमर्दार्धयोः आनयनम्।
- वलनसाधनम्।
- शरादीनाम् अङ्गुलमानेन परिवर्तनक्रमः च।

अन्वितिः ३. सूर्यग्रहणे वैशिष्ट्यम्। **श्रेयोऽङ्कः १**

- नतिलम्बनयोः भावाभावनिर्णयः।
- लग्नाग्रासाधनम्।
- नतांशज्यासाधनम्।
- दृक्षेपदृग्गतिसाधनम् लम्बनसाधनम्।
- दृक्क्षेपात् नतिसाधनम्।
- स्पष्टनतेः आनयनं तत्प्रयोजनकथनं च।
- स्पर्शमोक्षकालज्ञानम्।
- स्थितिविमर्दार्धयोः वैशिष्ट्यं च।

अन्वितिः ४. ग्रहणयोः सोदाहरणम् अभ्यासः। **श्रेयोऽङ्कः १**

- चन्द्रग्रहणगणितोदाहरणम्।
- सूर्यग्रहणगणितोदाहरणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Śāstrī, K. (Ed.). (1946). Sūryasiddhāntaḥ (Tattvāmṛtavyākhyopetaḥ). Banaras : Choukhamba Sanskrit Series Office.
2. Śāstrī, B. (Ed.). (2005). Siddhāntaśiromaṇiḥ (Vāsanābhāṣyopetaḥ). Varanasi : Choukhamba Sanskrit Sansthān.

3. Paṇḍeya, R. (Ed.). (2016). Sūryasiddhāntaḥ (Gūḍhārthaprakāśikāvyākhyopetaḥ). New Delhi : Choukhamba Surabhāratī Prakāśana.

सहायकाः ग्रन्थाः (Additional Readings)

1. Sharma, R. (Ed.). (1966). Brāhmasphuṭasiddhāntaḥ. New Delhi : Indian Institute of Astronomical & Sanskrit Research.
2. Dvivedī, K. (Ed.). (1966). Siddhāntatattvavivekaḥ. Varanasi : Sampūrṇānanda Saṃskṛta Viśvavidyālaya.
3. Śukla, K. S., & Śarmā, K. V. (Eds.). (1976). Āryabhaṭīyam. Delhi : INSA.
4. Upādhyāya, A. K. (Ed.). (1996). Siddhāntadarpaṇaḥ. Delhi : Nāg Prakāśan.
5. Bhat, A. S. (Ed.). (2012). Siddhāntaśekharaḥ. Delhi : INSA.

तृतीयवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

पञ्चमसत्रार्द्धः (Semester - 5)

प्रधानः पाठ्यक्रमः (Major) 3.1: भूमिस्वरूपं लोकव्यवस्था च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ब्रह्माण्डमध्ये पृथिव्याः स्थितिविषयकं ज्ञानम्।
2. पृथ्विव्यां पाताल-समुद्र-मेरुस्थितेः अवगमनम्।
3. देवासुराणां रवेः दर्शनादर्शनस्थित्यवबोधनं, बहुविधाहोरात्रव्यवस्थायाः च अवबोधनम्।
4. सदोदितरविदर्शनप्रदेशज्ञानम्।
5. ग्रहकक्षायोजनानां, खकक्षायोजनस्य च प्रमाणज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्राचीनभारतीयाः भुवः गोलाकारत्वमेव स्पष्टं प्रत्यपादयन् इति सप्रमाणं निरूपयितुं सक्षमाः भविष्यन्ति।
2. ब्रह्माण्डमध्ये पृथिव्याः स्थितिविषयकं स्वरूपं वर्णयितुं शक्ष्यन्ति।
3. पृथ्विव्यां पाताल-समुद्र-मेरुस्थितेः वर्णनं कर्तुं शक्ष्यन्ति।
4. भूगोले अहोरात्रव्यवस्थां विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।
5. ग्रहकक्षायोजनानां, खकक्षायोजनस्य च प्रमाण स्वरूपं वर्णयितुं शक्ष्यन्ति।
6. पाश्चात्त्यसिद्धान्तेन सह ग्रहकक्षायोजनानाम् आकाशकक्षायोजनानां च तुलनां कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.1	भूमिस्वरूपं लोकव्यवस्था च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भारतीयज्योतिश्शास्त्रदृष्ट्या जगदुत्पत्तिः। **श्रेयोऽङ्कः १**

- सूर्यसिद्धान्तोक्तः सृष्टिक्रमः।
- सिद्धान्तशिरोमणौ सृष्टिक्रमः।
- निरक्षे नवत्यंशान्तरिताः देशाः।
- भुवः गोलाकारत्वम्।

- आकर्षणशक्तिः।

अन्वितिः २. भूगोले अहोरात्रव्यवस्था। **श्रेयोऽङ्कः १**

- निरक्षात् नवत्यंशाक्षांशपर्यन्तम् अहोरात्रव्यवस्था।
- देवासुरयोः अहोरात्रभेदः।
- नवत्यक्षांशप्रदेशे प्रत्येकं राश्यन्ताहोरात्रवृत्ते रवेः सञ्चारक्रमः।
- ध्रुवनक्षत्रस्य नतोन्नतज्ञानं च।
- दिनमानव्यवस्था,षष्ठीघट्यात्मकदिनरात्रिः द्विमास-मासचतुष्टयात्मक दिनरात्रिव्यवस्था।

अन्वितिः ३. ग्रहकक्षाप्रमाणं कक्षाक्रमश्च। **श्रेयोऽङ्कः १**

- चन्द्रादीनां कक्षायोजनमानानि।
- ग्रहकक्षाक्रमे भारतीयदृष्टिः पाश्चात्त्यदृष्टिः च।
- वर्षमासदिनहोराधिपाः।
- खकक्षामानम्।

अन्वितिः ४. भुवनकोशः (सिद्धान्तशिरोमणिस्थः) **श्रेयोऽङ्कः १**

- भूगोले सप्तानां द्वीपानां समुद्राणां शिखराणां च वर्णनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Śāstrī, K. (Ed.). (1946). Sūryasiddhāntaḥ (Tattvāmṛtavyākhyopetaḥ). Banaras : Choukhamba Sanskrit Series Office.
2. Śāstrī, B. (Ed.). (2005). Siddhāntaśiromaṇiḥ (Vāsanābhāṣyopetaḥ). Varanasi : Choukhamba Sanskrit Sansthān.
3. Paṇḍeya, R. (Ed.). (2016). Sūryasiddhāntaḥ (Gūḍhārthaprakāśikāvyākhyopetaḥ). New Delhi : Choukhamba Surabhāratī Prakāśan.

सहायकाः ग्रन्थाः (Additional Readings)

1. Sharma, R. (Ed.). (1966). Brāhmasphuṭasiddhāntaḥ. New Delhi : Indian Institute of Astronomical & Sanskrit Research.
2. Dvivedī, K. (Ed.). (1966). Siddhāntatattvavivekaḥ. Varanasi : Sampūrṇānanda Saṃskṛta Viśvavidyālaya.
3. Upādhyāya, A. K. (Ed.). (1996). Siddhāntadarpaṇaḥ. Delhi : Nāg Prakāśan.
4. Śukla, K. S., & Śarmā, K. V. (Eds.). (1976). Āryabhaṭīyam. Delhi : INSA.
5. Bhat, A. S. (Ed.). (2012). Siddhāntaśekharaḥ. Delhi : INSA.

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.2: युति-उदयास्त-पातविषयाः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. द्व्याधिकानां ग्रहाणां ग्रहनक्षत्रयोः च युतेः परिज्ञानम्।
2. अस्त-युद्ध-समागमानां परिभाषायाः, गणितेन एतेषां कालसाधनक्रमस्य च परिज्ञानम्।
3. दृक्कर्मसंस्कारस्य औचित्यविमर्शस्य परिचयः।
4. वैधृति-व्यतीपातयोः सम्भवासम्भवज्ञानपूर्वकं तद्गणितविशेषाध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भाविनि काले कदा ग्रहयुतिः भविता इति निरूपयितुं समर्थाः भविष्यन्ति।
2. यथा ग्रहयुतिः तथैव ग्रहनक्षत्रयोः युतिः अपि असकृत् भवतीति प्रतिपादयितुं सक्षमाः भविष्यन्ति।
3. अगस्त्य-लुब्धक-अग्नि-ब्रह्महृदय-प्रजापति-अपांवत्स-आपाख्यनां नक्षत्राणां वर्णनं कर्तुं समर्थाः भविष्यन्ति।
4. ग्रहयुतिं, भग्रहयुतिं, ग्रहोदयं च सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।
5. सूर्यचन्द्रयोः क्रान्तिसाम्यरूपस्य वैधृति-व्यतीपाताभिधस्य महापातस्य निरूपणे कुशलाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.2	युति-उदयास्त-पातविषयाः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ग्रहयुतिः। **श्रेयोऽङ्कः १**

- युतिपरिभाषा।
- युतेः गतगम्यनिरूपणम्।
- युतेः गतैष्यदिनानयनम्।
- आयन-अक्षज-स्फुटदृक्कर्माणि।
- चन्द्रकक्षायां ताराग्रहाणां बिम्बमानानि।
- युतिदर्शनप्रकारः।

- ग्रहयुतिभेदाः।
- ग्रहयुद्धभेदाः।
- युद्धे जिताजितग्रहलक्षणं च।
- ग्रहयुतिगणितस्य सोदाहरणम् अभ्यासः।

अन्वितिः २. भग्रहयुतिः। **श्रेयोऽङ्कः १**

- नक्षत्राणां ध्रुवकाः।
- नक्षत्राणां शराः।
- अगस्त्य-लुब्धक-अग्नि-ब्रह्महृदय-प्रजापति-अपांवत्स-आपाख्यनां नक्षत्राणां विचारः।
- रोहणीशकटभेदः।
- ग्रहनक्षत्रयोः युतिसाधनप्रकरः।
- नक्षत्राणां योगताराः च।
- भग्रहयुतिगणितस्य सोदाहरणम् अभ्यासः।

अन्वितिः ३. उदयास्तौ। **श्रेयोऽङ्कः १**

- उदयास्तपरिभाषा।
- उदयास्तदिङ्निर्णयः।
- उदयास्तकालांशाः।
- नक्षत्राणाम् उदयास्तविचारः।
- उदयास्तकालानयनम्।
- उदयास्तगणितस्य सोदाहरणम् अभ्यासः।

अन्वितिः ४. महापातः। **श्रेयोऽङ्कः १**

- वैधृतिव्यतीपातयोः लक्षणम्।
- पातस्वरूपं,गण्डान्तलक्षणम्।
- पातस्य अशुभत्वनिरूपणम्।
- पातगणितोपकरणानि।
- चन्द्रस्य स्फुटक्रान्त्यानयनम्।
- पातयोः गतैष्यज्ञानं गतैष्यदिनानयनम्।

- पातस्थितिः पातारम्भः पातविरामः च।
- पातगणितस्य सोदाहरणम् अभ्यासः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Śāstrī, K. (Ed.). (1946). Sūryasiddhāntaḥ (Tattvāmṛtavyākhyopetaḥ). Banaras : Choukhamba Sanskrit Series Office.
2. Śāstrī, B. (Ed.). (2005). Siddhāntaśiromaṇiḥ (Vāsanābhāṣyopetaḥ). Varanasi : Choukhamba Sanskrit Sansthān.
3. Paṇḍeya, R. (Ed.). (2016). Sūryasiddhāntaḥ (Gūḍhārthaprakāśikāvyākhyopetaḥ). New Delhi : Choukhamba Surabhāratī Prakāśan.

सहायकाः ग्रन्थाः (Additional Readings)

1. Sharma, R. (Ed.). (1966). Brāhmasphuṭasiddhāntaḥ. New Delhi : Indian Institute of Astronomical & Sanskrit Research.
2. Upādhyāya, A. K. (Ed.). (1996). Siddhāntadarpaṇaḥ. Delhi : Nāg Prakāśan.
3. Dvivedī, K. (Ed.). (1966). Siddhāntatattvavivekaḥ. Varanasi : Sampūrṇānanda Saṃskṛta Viśvavidyālaya.
4. Śukla, K. S., & Śarmā, K. V. (Eds.). (1976). Āryabhaṭīyam. Delhi : INSA.
5. Bhat, A. S. (Ed.). (2012). Siddhāntaśekharaḥ. Delhi : INSA.

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

षष्ठसत्रार्द्धः (Semester – 6)

प्रधानः पाठ्यक्रमः (Major) 3.3: सिद्धान्ततत्त्वविवेकोक्तानि स्पष्टाधिकारान्तवैशिष्ट्यानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ग्रहगणिते श्रीकमलाकरभट्टस्य योगदानानाम् अध्ययनम्।
2. सूर्यसिद्धान्तस्य वैशिष्ट्यस्य अवगमनम्।
3. सूर्यसिद्धान्त-आर्यभटीय-ब्राह्मस्फुटसिद्धान्त-सिद्धान्तशेखर-सिद्धान्तशिरोमणिग्रन्थेषु मध्यम-स्पष्टाधिकारयोः प्रतिपादितानां प्रमेयानां विषये कमलाकरभट्टस्य चिन्तनानाम् अनुशीलनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. सिद्धान्तज्यौतिषे श्रीकमलाकरभट्टस्य महिमानं लोके प्रसारयितुं सक्षमाः भविष्यन्ति।
2. उत्पातविषये श्रीकमलाकरभट्टस्य मतं प्रस्तोतुं समर्थाः भविष्यन्ति।
3. लोहगोलखण्डनं भास्करोक्तबीजकर्मखण्डनं च अधिगन्तुं शक्ष्यन्ति।
4. ज्योत्पत्तिविषये स्पष्टं ज्ञानं प्राप्स्यन्ति।
5. सूर्यसिद्धान्तस्य वैशिष्ट्यस्य अवगन्तुं समर्थाः भविष्यन्ति।
6. दशविधकुण्डानां रचनाक्रमे तेषां क्षेत्रफलाद्यानयने च दक्षाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.3	सिद्धान्ततत्त्वविवेकोक्तानि स्पष्टाधिकारान्तवैशिष्ट्यानि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मध्यमाधिकारवैशिष्ट्यम् - १ **श्रेयोऽङ्कः १**

- कालसंज्ञा।
- कालमानानि।
- भूलोकादिस्थितिः।
- सृष्ट्यारम्भकालः।
- अहर्गणः।
- अधिमास-क्षयमास-क्षयदिनानां स्वरूपम्।
- गोलनिरूपणम्।
- भूगोलस्वरूपम्।
- परिधव्याससम्बन्धः।
- वृत्तक्षेत्रफलानयनं तत्र प्रकारान्तरं च।

- कमलाकरभट्टेन अन्येषाम् आचार्याणाम् उपरि कृतस्य आरोपस्य विमर्शः।

अन्वितिः २. मध्यमाधिकारवैशिष्ट्यम् - २ **श्रेयोऽङ्कः १**

- भूपरिधिनिरूपणम्।
- देशान्तरम्।
- गर्भक्षितिज-उदयास्तक्षितिजादिलक्षणम्।
- इन्द्रचाप-उल्का-मघ-भूकम्प-महामारीलक्षणानि।
- बीजकर्मः।
- ग्रहकक्षा।
- लोहगोलः।
- ऊर्ध्वाधस्स्वस्तिकादिसंज्ञाः।
- पतित-परावर्तितकोणविषयः च।
- कमलाकरभट्टेन अन्येषाम् आचार्याणाम् उपरि कृतस्य आरोपस्य विमर्शः।

अन्वितिः ३. स्पष्टाधिकारवैशिष्ट्यम् - १ **श्रेयोऽङ्कः १**

- आसन्नमूलम्।
- वर्ग-आयत-त्रिभुजलक्षणानि।
- ज्योत्पत्तिः।
- कुण्डगणितम्।
- कमलाकरभट्टेन अन्येषाम् आचार्याणाम् उपरि कृतस्य आरोपस्य विमर्शः।

अन्वितिः ४. स्पष्टाधिकारवैशिष्ट्यम् - २ **श्रेयोऽङ्कः १**

- मन्दशीघ्रपरिधि-मन्दशीघ्रफल-अन्त्यफलज्याविचारः।
- शीघ्रकर्णानयनम्।
- धनर्णोपपत्तिः।
- प्रतिवृत्तभङ्गिः।
- नीचोच्चवृत्तभङ्गिः।
- वक्रगतिः।
- अयनचलनम्।
- सङ्क्रान्तिपुण्यकालः च।
- कमलाकरभट्टेन अन्येषाम् आचार्याणाम् उपरि कृतस्य आरोपस्य विमर्शः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Dvivedī, K. (Ed.). (1966). Siddhāntatattvavivekaḥ. Varanasi : Sampūrṇānanda Saṃskṛta Viśvavidyālaya.
2. Śāstrī, B. (Ed.). (2005). Siddhāntaśiromaṇiḥ (Vāsanābhāṣyopetaḥ). Varanasi : Choukhamba Sanskrit Sansthān..

सहायकाः ग्रन्थाः (Additional Readings)

1. Śarmā, M. (Ed.). (1932). Siddhāntasārvabhaumaḥ. Banaras : Government Sanskrit College.
2. Sharma, R. (Ed.). (1966). Brāhmasphuṭasiddhāntaḥ. New Delhi : Indian Institute of Astronomical & Sanskrit Research.
3. Śukla, K. S., & Śarmā, K. V. (Eds.). (1976). Āryabhaṭīyam. Delhi : INSA.
4. Bhat, A. S. (Ed.). (2012). Siddhāntaśekharaḥ. Delhi : INSA.

चतुर्थवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
400-499

श्रेयोऽङ्काः - 4
होराः - 60

सप्तमसत्रार्द्धः (Semester - 7)

प्रधानः पाठ्यक्रमः (Major) 4.1: शृङ्गोन्नति-छेद्यकविषयाः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. चन्द्रशृङ्गोन्नतेः वैशिष्ट्यनिरूपणम्।
2. मासस्य प्रथमचतुर्थपादयोः एव शृङ्गोन्नतेः दर्शने कारणत्वविमर्शनम्।
3. चन्द्रस्य शृङ्गयोः कतरत् शृङ्गम् उन्नतं दृश्यते इत्यस्य परिज्ञानम्।
4. वास्तवचन्द्रशृङ्गोन्नतेः वैशिष्ट्यज्ञानम्।
5. आलेख्यद्वारा ग्रहणादीनां स्थितेः स्पष्टं निरूपणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. अभीष्टदिने चन्द्रशृङ्गोन्नतिं गणयितुं समर्थाः भविष्यन्ति।
2. परिलेखद्वारा ग्रहणं शृङ्गोन्नतिं च वर्णयितुं पटवः भविष्यन्ति।
3. वास्तवचन्द्रशृङ्गोन्नतिं विज्ञाय प्राचीनसिद्धान्तेषु प्रतिपादितानां विषयाणां याथातथ्यं भृशं विचारयितुं सक्षमाः भविष्यन्ति।
4. आलेख्यद्वारा ग्रहणादीनां स्थितेः स्पष्टकर्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 4.1	शृङ्गोन्नति-छेद्यकविषयाः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्राचीनग्रन्थेषु निरूपिता चन्द्रशृङ्गोन्नतिः। **श्रेयोऽङ्कः १**

- शुक्लपक्षे रवेःअस्तापरं चन्द्रास्तकालानयनम्।
- कृष्णपक्षे सूर्यास्तानन्तरं चन्द्रोदयकालानयनम्।
- शृङ्गोन्नतौ भुजकोटिकर्णाः।
- चन्द्रबिम्बे शुक्लाङ्गुलानयनं च।

अन्वितिः २. वास्तवचन्द्रशृङ्गोन्नतिः - १ **श्रेयोऽङ्कः १**

- वराहोक्तशृङ्गोन्नतिविचारः।
- चन्द्रबिम्बे दृश्यादृश्यभागः।
- बिम्बस्य दीर्घवृत्तत्वम्।
- शुक्लवृत्तकेन्द्रम्।
- बिम्बार्धाधिकशुक्लवर्णनम्।
- वास्तवशुक्लवृत्तस्य लघुवृत्तत्वम्।
- अवास्तवशुक्लवृत्तविशेषः।
- शुक्लवृत्त-स्वदृश्यवृत्तयोः व्यासार्धानयनं च।

अन्वितिः ३. वास्तवचन्द्रशृङ्गोन्नतिः - २ **श्रेयोऽङ्कः १**

- कमलाकरोक्तरीत्या वास्तवसितांशानयनम्।
- परमसितांशस्थलनिरूपणम्।
- परिलेखोपकरणानि।
- सिताङ्गुलानयने प्राचीनमतविमर्शः।
- दिग्वलनदिग्व्यवस्था च।

अन्वितिः ४. छेद्यकम्। **श्रेयोऽङ्कः १**

- छेद्यकपरिभाषा।
- सिद्धान्तसम्मतः ग्रहणपरिलेखः।
- सिद्धान्तसम्मतः शृङ्गोन्नतिपरिलेखः।
- वास्तवचन्द्रशृङ्गोन्नतिग्रन्थोक्तः परिलेखविशेषः च।
- सम्मीलनोन्मीलपरिलेखः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Śāstrī, K. (Ed.). (1946). Sūryasiddhāntaḥ (Tattvāmṛtavyākhyopetaḥ). Banaras : Choukhamba Sanskrit Series Office.
2. Śāstrī, B. (Ed.). (2005). Siddhāntaśiromaṇiḥ (Vāsanābhāṣyopetaḥ). Varanasi : Choukhamba Sanskrit Sansthān.
3. Dvivedī, S. (n.d.). Vāstavacandraśṛṅgonnatiḥ. Varanasi : Sampūrṇānanda Saṃskṛta Viśvavidyālaya.

सहायकाः ग्रन्थाः (Additional Readings)

1. Sharma, R. (Ed.). (1966). Brāhmasphuṭasiddhāntaḥ. New Delhi : Indian Institute of Astronomical & Sanskrit Research.
2. Dvivedī, K. (Ed.). (1966). Siddhāntatattvavivekaḥ. Varanasi : Sampūrṇānanda Saṃskṛta Viśvavidyālaya.
3. Śukla, K. S., & Śarmā, K. V. (Eds.). (1976). Āryabhaṭīyam. Delhi : INSA.
4. Upādhyāya, A. K. (Ed.). (1996). Siddhāntadarpaṇaḥ. Delhi : Nāg Prakāśan.
5. Bhat, A. S. (Ed.). (2012). Siddhāntaśekharaḥ. Delhi : INSA.

काठिन्यस्तरः
400-499

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 4.2: वेधशालापरिचयः (यन्त्राणां परिचयः प्रयोगः निर्माणविधिश्च)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. प्राचीनभारतस्य खगोलविज्ञानस्य अध्ययनम्।
2. गोल-नाडीवलय-शङ्कु-यष्टि-घटी-चक्र-चाप-तुर्य-फलकादियन्त्राणां रचनाक्रमस्य अध्ययनम्।
3. स्वयंवहयन्त्राणां निर्माणविधेः ज्ञानम्।
4. ग्रहवेधार्थं प्राचीनकाले निर्मितासु वेधशालासु विद्यमानानां यन्त्राणां परिचयप्रदानम्।
5. वेधशालायां ग्रहवेधप्रक्रियायाः अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्राचीनभारतस्य खगोलविज्ञानस्य वर्णनं कर्तुं समर्थाः भविष्यन्ति।
2. सूर्यसिद्धान्तादिषु ग्रन्थेषु प्रतिपादितानां गोलादीनां यन्त्राणां परिचयं प्राप्य तेषां रचनां कर्तुं प्रभविष्यन्ति।
3. गोल-नाडीवलय-शङ्कु-यष्टि-घटी-चक्र-चाप-तुर्य-फलकादियन्त्राणां रचनाक्रमस्य स्वरूपं वर्णयितुं शक्ष्यन्ति।
4. ग्रहवेधार्थं प्राचीनकाले निर्मितासु वेधशालासु विद्यमानानां यन्त्राणां कर्तुं समर्थाः भविष्यन्ति।
5. पूर्वं सूर्यसिद्धान्त-आर्यभटीय-ग्रहलाघाव-केतकीग्रहगणितद्वारा साधितानां स्फुटीकृतग्रहाणां वेधं कर्तुं सक्षमाः भविष्यन्ति।
6. यन्त्राणां निर्माणस्वरूपं च सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 4.2	वेधशालापरिचयः (यन्त्राणां परिचयः प्रयोगः निर्माणविधिश्च)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सिद्धान्तग्रन्थप्रदिपादितानि यन्त्राणि। **श्रेयोऽङ्कः १**

- सूर्यसिद्धान्तोक्तानां यन्त्राणां परिचयः।
- सिद्धान्तशिरोमणेः यन्त्राध्यायः।

- सम्राट्-सिद्धान्तस्य यन्त्राध्यायः।

अन्वितिः २. वेधशालायाः परिचयः। **श्रेयोऽङ्कः १**

- वेधस्य महत्त्वम्।
- वेधोपकरणानि।
- भारतवर्षे विद्यमानाः वेधशालाः।
- वेधे राज्ञः जयसिंहस्य योगदानम्।
- वेधशालायां यन्त्राणि।

अन्वितिः ३. वेधयन्त्राणां प्रयोगः। **श्रेयोऽङ्कः १**

- दक्षिणोत्तरभित्ति-शङ्कु-नाडीवलय-क्रान्तिवलय-राशिवलय-राम-दिगंश-सम्राट्-कपालादियन्त्रेभ्यः वेधविधिः।

अन्वितिः ४. यन्त्राणां निर्माणप्रक्रिया। **श्रेयोऽङ्कः १**

- गोलादीनां यन्त्राणां निर्माणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Kṛpāśaṅkara & Keśavārāma (Eds.). (1936). Yantrarājaḥ (Mahendraguru-viracitaḥ) & Yantraśiromaṇiḥ (Śrīviśrāma-viracitaḥ). Mumbai : Nirṇayasāgara Press.
2. Śāstrī, K. (Ed.). (1946). Sūryasiddhāntaḥ (Tattvāmṛtavyākhyopetaḥ). Banaras : Choukhamba Sanskrit Series Office.
3. Sharma, R. (Ed.). (1967). Samrāṭsiddhāntaḥ (Samrāṭ Jagannātha-viracitaḥ). New Delhi : Indian Institute of Astronomical & Sanskrit Research.
4. Śāstrī, B. (Ed.). (2005). Siddhāntaśiromaṇiḥ (Vāsanābhāṣyopetaḥ). Varanasi : Choukhamba Sanskrit Sansthān.

सहायकाः ग्रन्थाः (Additional Readings)

1. Arvācīnaṃ Jyotirvigñānam (Rāmanātha Sahāya-viracitam). (1964). Vārāṇasī : Vārāṇaseya Saṃskṛta Viśvavidyālaya.
2. Jyotirvigñānam (Arkasomayājidhūlipāla-viracitam). (1964). Vārāṇasī : Vārāṇaseya Saṃskṛta Viśvavidyālaya.
3. Sharma, R. (Ed.). (1966). Brāhmasphuṭasiddhāntaḥ. New Delhi : Indian Institute of Astronomical & Sanskrit Research.
4. Dvivedī, K. (Ed.). (1966). Siddhāntatattvavivekaḥ. Varanasi : Sampūrṇānanda Saṃskṛta Viśvavidyālaya.
5. Upādhyāya, A. K. (Ed.). (1996). Siddhāntadarpaṇaḥ. Delhi : Nāg Prakāśan.
6. Bhat, A. Ś. (Ed.). (2012). Siddhāntaśekharaḥ. Delhi : INSA.

काठिन्यस्तरः
400-499

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 4.3: दीर्घवृत्तलक्षणं, ब्रह्माण्डस्वरूपवर्णनं च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. दीर्घवृत्तनियमानां परिज्ञानम्।
2. प्राचीनग्रन्थेषु बीजरूपेण निहितानां दीर्घवृत्तीयतत्त्वानाम् अध्ययनम्।
3. ब्रह्माण्डस्वरूपविषये प्राच्य-पाश्चात्त्यविचारधाराणां विमर्शनम्।
4. सौरपरिवारनिरूपणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दीर्घवृत्तनियमानां वर्णनं कर्तुं शक्ष्यन्ति।
2. भारतीयाः साम्प्रदायिकाः ज्यौतिषिकाः अपि ग्रहाणां चलनवृत्तं दीर्घाकारकमिति जानन्ति स्म इति स्पष्टं प्रतिपादयितुं समर्थाः भविष्यन्ति।
3. द्विनाभिकवृत्तानां परिभाषाणां नियमानां च अध्ययनं कृत्वा तेषां ज्यामानानयने समर्थाः भविष्यन्ति।
4. अस्माकं ब्रह्माण्डस्य सौरमण्डलस्य सौरपरिवाराणां च विषये प्राचीनानां नवीनानां च मतानि निरूपयितुं कुशलाः भविष्यन्ति।
5. ब्रह्माण्डस्वरूपविषये प्राच्य-पाश्चात्त्यविचारधाराणां विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 4.3	दीर्घवृत्तलक्षणं, ब्रह्माण्डस्वरूपवर्णनं च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. दीर्घवृत्तसाध्याः - 1 **श्रेयोऽङ्कः १**

- दीर्घवृत्तपरिचयः।
- दीर्घवृत्ते अक्षादिपरिभाषाः।
- भुजकोट्योः लक्षणम्।
- समानसम्बन्धनिरूपणम्।
- दीर्घवृत्तत्वनिरूपणम्।
- बृहद्व्यासानयनम्।
- भुजात्कोट्यानयनम्।
- कोटिसाधनम्।

- लघुव्यासानयनम्।
- लघुव्यासे कोटिमानं परिणतकोटिमानं च।
- बृहद्व्यासतुल्यत्वनिरूपणम्।
- अनुशिक्षणं साध्याभ्यासश्च।

अन्वितिः २. दीर्घवृत्तसाध्याः - 2 **श्रेयोऽङ्कः १**

- रूपतुल्ये सम्बन्धे व्यासप्रमाणम्।
- शून्यतुल्ये सम्बन्धे व्यासप्रमाणम्।
- दीर्घवृत्ते केन्द्रनाभ्यन्तरमानम्।
- शून्यतुल्ये नाभिकेन्द्रान्तरे वक्रस्य वृत्तत्वम्।
- दीर्घवृत्ते नाभितो लघुव्याग्रगतरेखायाः बृहद्व्यासार्द्धतुल्यत्वनिरूपणम्।
दर्शनार्थी-सौविध्यव्यवस्थापनम्	✓	✓	✓	✓	✓	✓	✓

मन्दिरसंस्कृतिप्रबन्धनस्नातकगुणाः

मन्दिरसंस्कृतिप्रबन्धनपाठ्यचर्यायाः स्नातकगुणाः

- भारतीयज्ञानपरम्परायाः संरक्षणम्
- मन्दिरसंस्कृतेः विकासः।
- स्थापत्यकलायाः विकासः।
- मन्दिरप्रबन्धनस्य दक्षता।
- युगानुकूलतया समन्वयसम्पादनपूर्वकं भारतस्य समग्रविकासे सहयोगः।
- संस्कृतस्य संस्कृतेश्च सम्पूर्णविश्वे प्रचारः प्रसारः।
- प्राचीनविषयाणाम् आधुनिकविषयैः सह समन्वयः।
- सभ्यसमाजस्य निर्माणम्।
- राष्ट्रं प्रति स्वकर्त्तव्यस्य निर्वाहः।
- भारतीयज्ञानपरम्परायां मन्दिरस्थापत्यस्य संस्कृतेः प्रबन्धनस्य च सम्यग्ज्ञापनेन कार्यक्रमोऽयं भारतस्य प्रतिष्ठां वर्धयिष्यति, भारतस्य समग्रविकासे च सहकरोति ।

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1.	प्रथमवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 1.1: मन्दिरसंस्कृतेः इतिहासः	4	100-199
2.		प्रधानः 1.2: भारतीयमन्दिरपरम्परा	4	100-199
3.		प्रधानः 1.3: मन्दिरस्थापत्यम्	4	100-199
4.		प्रधानः 1.4: मन्दिरप्रतिमाविधानम्	4	100-199
5.		प्रधानः 1.5: प्रतिमानिर्माणविज्ञानम्	4	100-199
6.		प्रधानः 1.6: मन्दिरनिर्माणं जीर्णोद्धारश्च	4	100-199
7.		प्रधानः 1.7: मन्दिरप्रकाराः मण्डपसभादिविधानञ्च	4	100-199
8.	द्वितीयवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 2.1: बृहद्देवालये उपमन्दिराणि	4	200-299
9.		प्रधानः 2.2: विविधधार्मिकसम्प्रदायानां परिचयः	4	200-299
10.		प्रधानः 2.3: अर्चनाविधानम्	4	200-299
11.		प्रधानः 2.4: अर्चकपरिचारकाणां व्यवस्था	4	200-299
12.		प्रधानः 2.5: ज्यौतिषशास्त्रपरिचयः	4	200-299
13.		प्रधानः 2.6: मन्दिरेषु पर्वनिर्वाहः	4	200-299
14.	तृतीयवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 3.1: मन्दिरसम्बद्धानां पुष्करिण्याऽऽरामाणां	4	300-399
15.		प्रधानः 3.2: मन्दिरपरिसराणां विकासप्रबन्धनम्	4	300-399
16.		प्रधानः 3.3: पुण्यतीर्थक्षेत्रेषु मन्दिराणां परस्परसमन्वयः	4	300-399
17.	चतुर्थवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 4.1: चित्रविधानम्	4	400-499
18.		प्रधानः 4.2: धार्मिकसङ्गीतप्रबन्धनम्	4	400-499
19.		प्रधानः 4.3: लोकन्यासव्यवस्था	4	400-499
20.		प्रधानः 4.4: दर्शनार्थि-सौविध्य-प्रबन्धनम्	4	400-499
21.		प्रधानः 4.5: मन्दिरव्यवस्थापने आपत्प्रबन्धनम्	4	400-499

गौणपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1.	द्वितीयवर्षीयाः गौणपाठ्यकमाः	गौण: 2.क.1: भारतीयमन्दिरपरम्परापरिचयः	4	200-299
2.		गौण: 2.क.2: मन्दिरप्रतिमापरिचयः	4	200-299
3.	तृतीयवर्षीयाः गौणपाठ्यक्रमाः	गौण: 3.क.1: मन्दिरनिर्माणं जीर्णोद्धारविधानञ्च	4	300-399
4.		गौण: 3.क.2: अर्चनापद्धतिपरिचयः	4	300-399
5.		गौण: 3.क.3: मन्दिरेषु पर्वपरम्परा	4	300-399
6.		गौण: 3.क.4: मन्दिरपरिसरविकासप्रबन्धनम्	4	300-399
7.	चतुर्थवर्षीयाः गौणपाठ्यक्रमाः	गौण: 4.क.1: लोकन्यासव्यवस्थापनम्	4	400-499
8.		गौण: 4.क.2: दर्शनार्थि-सौविध्यव्यवस्थापनम्	4	400-499

प्रथमवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester – 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: मन्दिरसंस्कृतेः इतिहासः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयमन्दिरसंस्कृतेः ऐतिहासिकपरिचयप्रदानम्।
2. भारतीयज्ञानपरम्परायां मन्दिरसंस्कृतेः अवगमनम्।
3. भारतीयधार्मिकाध्यात्मिकपरम्परायां मन्दिराणां स्थानम्।
4. शास्त्रेषु मन्दिराणामुल्लेखनं सन्दर्भप्रदानञ्च।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मन्दिरसंस्कृतेः इतिहासं व्याख्यातुं समर्थाः भविष्यन्ति।
2. भारतीयमन्दिरसंस्कृतिमवगमिष्यन्ति।
3. मन्दिराणां सन्दर्शनहेतोः भारतीयधार्मिकाध्यात्मिकज्ञानेन प्रवर्तननियमानवगमिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	मन्दिरसंस्कृतेः इतिहासः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मन्दिरसंस्कृतेः अवधारणा विकासश्च। **श्रेयोऽङ्कः १**

- मन्दिरस्य परिभाषा।
- मन्दिरस्य देवालय-देवकुलादिपर्यायशब्दाः।
- मन्दिरस्य महत्त्वम्।
- मन्दिरस्य वातावरणम्।
- मन्दिरसंस्कृतेः परिचयः।

- मन्दिरसंस्कृतेः विकासक्रमः।

अन्वितिः २. वैदिकार्चावास्तोः ऐतिहासिकपरिचयः। **श्रेयोऽङ्कः १**

- वैदिककाले धार्मिकं वास्तु।
- वेदी-चिति-यज्ञशालादीनां परिचयः निर्माणनियमाश्च।
- वैदिकार्चावास्तुनि मन्दिरविकाससूत्राणि।

अन्वितिः ३. मन्दिरस्य पौराणिकसन्दर्भाः। **श्रेयोऽङ्कः १**

- मत्स्य-अग्नि-पद्म-स्कन्दपुराणादिषु मन्दिरप्रस्तावः।
- मन्दिरसम्बद्धपौराणिकविषयाणां महत्त्वम्।
- संस्कृतवाङ्मये मन्दिरस्य प्राच्यप्रमाणं वास्तुविन्यासश्च।
- अर्थशास्त्र-प्रतिमानाटकादिप्राच्यग्रन्थेषु मन्दिरस्य प्रमाणम्।

अन्वितिः ४. लोके मन्दिराणां ऐतिहासिकीपरम्परा। **श्रेयोऽङ्कः १**

- वास्तुग्रन्थेषु चैत्यादिलौकिकधर्मस्थलानामुल्लेखः।
- वनवासीपरम्परायां धार्मिकं वास्तु।
- लोकदेवतापरम्परा देवस्थानञ्च।
- गृहेषु देवस्थानपरम्परा।
- लोककथानकेषु मन्दिरसंस्कृतेः ऐतिहासिकसन्दर्भाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. विद्याधर, डॉ., *भारतीय वास्तुशास्त्र का इतिहास*, नई दिल्ली, ईस्टर्न बुक लिंकर्स।
2. सहाय, सच्चिदानन्द, *मन्दिर स्थापत्य का इतिहास*, पटना, बिहार हिन्दी ग्रन्थ अकादमी।
3. गैरोला, वाचस्पति, *अर्थशास्त्र (टीका)*, वाराणसी, चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, वासुदेव, डॉ., *प्राचीन भारतीय स्तूप गुहा एवं मंदिर*, पटना, बिहार हिन्दी ग्रन्थ अकादमी, 2008।
2. जुगनू, श्रीकृष्ण, डॉ., *देवालय चन्द्रिका*, दिल्ली, परिमल पब्लिकेशंस, 2015।
3. सूर्यकान्त, डॉ., *वैदिक देवशास्त्र*, नई दिल्ली, मेहरचन्द लछमनदास पब्लिकेशंस, 2006।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: भारतीयमन्दिरपरम्परा

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयमन्दिरसंस्कृतेः सामान्यपरिचयप्रदानम्।
2. भारतीयज्ञानपरम्परायां मन्दिरसंस्कृतेः अवगमनम्।
3. भारतीयधार्मिकाध्यात्मिकपरम्परायां मन्दिराणां स्थानम्।
4. शास्त्रेषु मन्दिराणामुल्लेखनं सन्दर्भप्रदानञ्च।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मन्दिराणामवधारणां सम्यक्तया वर्णयितुं शक्ष्यन्ति।
2. वेदी-चिति-यज्ञशालादीनां परिचयं निर्माणनियमांश्च वक्तुं सिद्धाः भविष्यन्ति।
3. मन्दिरस्य पौराणिकसन्दर्भान् व्याख्यातुं समर्थाः भविष्यन्ति।
4. मन्दिराणां समाजे कः प्रभावः इति विश्लेषणं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	भारतीयमन्दिरपरम्परा	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मन्दिरस्यावधारणा। **श्रेयोऽङ्कः १**

- मन्दिरस्य परिभाषा।
- मन्दिरस्य महत्त्वम्।
- मन्दिरस्य वातावरणम्।

अन्वितिः २. वैदिकार्चावास्तु। **श्रेयोऽङ्कः १**

- वैदिककाले धार्मिकं वास्तु।
- वेदी-चिति-यज्ञशालादीनां परिचयः निर्माणनियमाश्च।
- वैदिकार्चावास्तुनि मन्दिरविकाससूत्राणि।

अन्वितिः ३. मन्दिरस्य पौराणिकसन्दर्भाः। **श्रेयोऽङ्कः १**

- मत्स्य-अग्नि-पद्म-स्कन्दपुराणादिषु मन्दिरप्रस्तावः।
- मन्दिरसम्बद्धपौराणिकविषयाणां महत्त्वम्।
- संस्कृतवाङ्मये मन्दिरस्य प्राच्यप्रमाणं वास्तुविन्यासश्च।

अन्वितिः ४. जनमानसे मन्दिराणां स्थानम्। **श्रेयोऽङ्कः १**

- मन्दिराणां समाजे प्रभावः।
- मन्दिरैः सामाजिकपरिवर्तनम्।
- मन्दिरैः मानवेषु परस्परसद्भावः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. विद्याधर, डॉ., *भारतीय वास्तुशास्त्र का इतिहास*, नई दिल्ली : ईस्टर्न बुक लिंकर्स।
2. सहाय, सच्चिदानन्द, *मन्दिर स्थापत्य का इतिहास*, पटना : बिहार हिन्दी ग्रन्थ अकादमी।
3. गैरोला, वाचस्पति, *अर्थशास्त्र (टीका)*, वाराणसी : चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. सूर्यकान्त, डॉ., (2006)*वैदिक देवशास्त्र*, नई दिल्ली : मेहरचन्द लछमनदास पब्लिकेशंस्।
2. उपाध्याय, वासुदेव, डॉ., (2008) *प्राचीन भारतीय स्तूप गुहा एवं मंदिर*, पटना : बिहार हिन्दी ग्रन्थ अकादमी।
3. जुगनू, श्रीकृष्ण, डॉ., (2015) *देवालय चन्द्रिका*, दिल्ली : परिमल पब्लिकेशंस्।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: मन्दिरस्थापत्यम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयस्थापत्यमूर्तिकलावैभवस्य ज्ञानप्रदानम्।
2. शिल्पकलावैभवस्यावगमनम्।
3. स्थापत्यकलावैभवस्य ज्ञानप्रदानम्।
4. मन्दिरनिर्माणवैविध्यस्य ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. देवालयस्थापत्यस्य शैल्याः परिचयं वास्तुशास्त्रीयलक्षणानि च वक्तुं शक्ष्यन्ति।
2. नागरशैल्याः वैशिष्ट्यं प्रतिपादयितुं शक्ष्यन्ति।
3. द्राविडशैल्याः वैशिष्ट्यं सोदाहरणं वर्णयिष्यन्ति।
4. वेसरशैल्याः वैशिष्ट्यम् उदाहरणानि च वक्तुं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	मन्दिरस्थापत्यम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. देवालयस्थापत्यस्य शैल्याः परिचयः वास्तुशास्त्रीयलक्षणानि च। **श्रेयोऽङ्कः १**

- नागरशैली।
- द्राविडशैली।
- वेसरशैली।
- आधुनिकस्थापत्यविज्ञाने वास्तुशैल्याः लक्षणानि।

अन्वितिः २. नागरशैल्याः वैशिष्ट्यम् उदाहरणानि च। **श्रेयोऽङ्कः १**

- गुप्तशैली।
- चन्देलशैली।
- उत्कलशैली।
- परमारशैली।

- काश्मीरशैली।
- बङ्गशैली।
- सौराष्ट्रशैली।
- देलवाड़ाजैनशैली।

अन्वितिः ३. द्राविडशैल्याः वैशिष्ट्यम् उदाहरणानि च। **श्रेयोऽङ्कः १**

- पल्लवशैली।
- चोलशैली।
- नायकशैली।
- पाण्ड्यशैली।
- विजयनगरशैली।

अन्वितिः ४. वेसरशैल्याः वैशिष्ट्यम् उदाहरणानि च। **श्रेयोऽङ्कः १**

- चालुक्यशैली।
- राष्ट्रकूटशैली।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. सहाय, सच्चिदानन्द, *मन्दिर स्थापत्य का इतिहास*, पटना, बिहार हिन्दी ग्रन्थ अकादमी।
2. उपाध्याय, उदयनारायण, प्रो., तिवारी, गौतम, प्रो., *भारतीय स्थापत्य एवं कला*, वाराणसी : मोतीलाल बनारसीदास।
3. Panda, N. C., Prof., Reddy, E. Shiva Nagi, *Temple Architecture of India*, New Delhi, Bhartiya Kala Prakashan.

सहायकाः ग्रन्थाः (Additional Readings)

1. उपाध्याय, वासुदेव, डॉ., *प्राचीन भारतीय स्तूप गुहा एवं मंदिर*, पटना, बिहार हिन्दी ग्रन्थ अकादमी, 2008।
2. जुगनू, श्रीकृष्ण, डॉ., *देवालय चन्द्रिका*, दिल्ली : परिमल पब्लिकेशंस, 2015।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: मन्दिरप्रतिमाविधानम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. प्रतिमाभेदस्य ज्ञानप्रदानम्।
2. चलाचलविग्रहाणां स्वरूपस्यावगमनम्।
3. सकलनिष्कलप्रतिमानां ज्ञानप्रदानम्।
4. उत्सवमूर्तेः महिम्नः ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्रतिमापरिचयं तद्भेदांश्च प्रतिपादयितुं समर्थाः भविष्यन्ति।
2. विविधलिङ्गपरिचयप्रदाने समर्थाः भविष्यन्ति।
3. शिवस्य नटराज-लकुलीश-भिक्षाटनादिप्रतिमानां वर्णने सिद्धाः भविष्यन्ति।
4. देवीप्रतिमास्वरूपं वर्णयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	मन्दिरप्रतिमाविधानम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रतिमापरिचयः भेदाश्च। **श्रेयोऽङ्कः १**

- प्रतिमा-मूर्त्यादयः पारिभाषिकशब्दाः।
- चलाचलविग्रहाः।
- लिङ्गं बेरञ्च।
- सकलनिष्कलप्रतिमा।
- सम्पूर्ण-आवक्ष-मुखारविन्दप्रतिमा।
- उत्सवमूर्तिः।

अन्वितिः २. विविधलिङ्गपरिचयः। **श्रेयोऽङ्कः १**

- लिङ्गसंरचना।
- जलहारिकादि अङ्गानि, मुखलिङ्गम्।
- सहस्रलिङ्गम्।
- ब्राह्मादिलिङ्गानि।
- रत्नज-दारुज-शैलजादिलिङ्गभेदाः।

अन्वितिः ३. देवप्रतिमापरिचयः। **श्रेयोऽङ्कः १**

- शिवस्य नटराज-लकुलीश-भिक्षाटनादिप्रतिमानां परिचयः।
- विष्णोः शयनादिमुद्राः।
- राम-कृष्ण-ब्रह्मा-इन्द्रकुबेरादीनां प्रतिमाः।

अन्वितिः ४. देवीप्रतिमापरिचयः। **श्रेयोऽङ्कः १**

- महालक्ष्मी-महाकाली-सरस्वती-महिषासुरमर्दिनी–दुर्गादेवी-पद्मावतीदेव्यादिप्रतिमानां रूपाणि।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जुगनू, श्रीकृष्ण, *अपराजितपृच्छा*, दिल्ली : परिमल संस्कृत ग्रंथमाला।
2. पाण्डेय, शैलजा (टीकाकार), *मयमत*, वाराणसी : चौखम्भा सुरभारती प्रकाशन।
3. डेगेंस, ब्रूनो (टीकाकार), *मयमत*, वाराणसी : मोतीलाल बनारसीदास प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. जुगनू, श्रीकृष्ण, डॉ. (सम्पादन), *देवतामूर्तिप्रकरण*, नई दिल्ली : न्यू भारतीय बुक कार्पोरेशन।
2. सिन्हा, कमलेश, श्रीमती, चन्द्र, दिनेश, डॉ., (1990), *भारतीय प्रतिमा विज्ञान*, नई दिल्ली : अयन प्रकाशन।
3. सूर्यकान्त, डॉ., (2006) *वैदिक देवशास्त्र*, नई दिल्ली : मेहरचन्द लछमनदास पब्लिकेशंस।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester – 2)

प्रधानः पाठ्यक्रमः (Major) 1.5: प्रतिमानिर्माणविज्ञानम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. पार्थिवादिप्रतिमानिर्माणपदार्थानां ज्ञानप्रदानम्।
2. दारुजप्रतिमायाः विज्ञानप्रदानम्।
3. शैलजप्रतिमायाः परिज्ञानप्रदानम्।
4. धातुज-रत्नजयोः प्रतिज्ञाविज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मन्दिरस्थानां विभिन्नविग्रहाणां निर्माणावसरे पार्थिवादिप्रतिमानिर्माणपदार्थानां स्वरूपं वर्णयिष्यन्ति।
2. दारुजप्रतिमावैशिष्ट्यं प्रतिपादयिष्यन्ति।
3. शिलया निर्मितविग्रहाणां स्वरूपं वर्णयिष्यन्ति।
4. धातु-रत्नादिना निर्मितविभिन्नप्रतिमानां निर्माणशैलीव्याख्यास्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.5	प्रतिमानिर्माणविज्ञानम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रतिमापदार्थपरिचयः। **श्रेयोऽङ्कः १**

- पार्थिवप्रतिमानिर्माणविज्ञानम्।
- दारुजप्रतिमानिर्माणविज्ञानम्।
- शैलजप्रतिमानिर्माणविज्ञानम्।
- धातुजप्रतिमानिर्माणविज्ञानम्।
- रत्नजादिप्रतिमानिर्माणविज्ञानम्।

अन्वितिः २. दारुजप्रतिमाविज्ञानम्। **श्रेयोऽङ्कः १**

- वृक्षचयनं - ग्राह्याग्राह्यकाष्ठम्।
- पुंस्त्र्यादिवृक्षभेदाः।
- सारदार्वादिवृक्षभेदाः।
- काष्ठगुणवत्ता वृक्षच्छेदनम्।
- काष्ठानयनम्।
- तक्षणकर्म-वर्णकर्मादयः।
- सुरक्षोपायाः।

अन्वितिः ३. शैलजप्रतिमाविज्ञानम्। **श्रेयोऽङ्कः १**

- शिलाचयनम्।
- ग्राह्याग्राह्यशिलाः।
- पुंस्त्र्यादिशिलाभेदाः।
- शिलानयनम्।
- तक्षणकर्म।
- लक्षणोद्धारः।

अन्वितिः ४. धातुज-रत्नज-पार्थिवादिप्रतिमाविज्ञानम्। **श्रेयोऽङ्कः १**

- अष्टविधधातवः।
- स्वर्णादिप्रतिमानिर्माणविधयः।
- रत्नजप्रतिमालक्षणं पारदलिङ्गविधानञ्च।
- पार्थिवप्रतिमाविज्ञानम्।
- मृत्तिकाचयनम्।
- शुभाशुभमृत्तिका।
- पक्वापक्व-मृण्मूर्तयः।
- पुष्पादीनां प्रतिमानिर्माणम्।

- हिमप्रतिमा।
- आधुनिकप्रतिमापदार्थाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जुगनू, श्रीकृष्ण, *अपराजितपृच्छा*, दिल्ली : परिमल संस्कृत ग्रंथमाला।
2. पाण्डेय, शैलजा (टीकाकार), *मयमत*, वाराणसी : चौखम्भा सुरभारती प्रकाशन।
3. डेगेंस, ब्रूनो (टीकाकार), *मयमत*, वाराणसी : मोतीलाल बनारसीदास प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. जुगनू, श्रीकृष्ण, डॉ. (सम्पादन), *देवतामूर्तिप्रकरण*, नई दिल्ली : न्यू भारतीय बुक कार्पोरेशन।
2. पाण्डेय, सुरेन्द्र कुमार, डॉ., *रत्न विमर्श*, इलाहाबाद, साहित्य संगम।
3. सिन्हा, कमलेश, श्रीमती, चन्द्र, दिनेश, डॉ., (1990), *भारतीय प्रतिमा विज्ञान*, नई दिल्ली : अयन प्रकाशन।
4. सूर्यकान्त, डॉ., *वैदिक देवशास्त्र*, नई दिल्ली : मेहरचन्द लछमनदास पब्लिकेशंस।
5. जुगनू, श्रीकृष्ण, डॉ. (सम्पादन), 2005, *वास्तु एवं शिलाचयन*, नई दिल्ली : न्यू भारतीय बुक कार्पोरेशन।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.6: मन्दिरनिर्माणं जीर्णोद्धारश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भूमेः चयनस्य ज्ञानप्रदानम्।
2. मन्दिरनिर्माणारम्भप्रक्रियायाः ज्ञानप्रदानम्।
3. प्रतिष्ठाविधानस्यावगमनम्।
4. जीर्णोद्धारविधानस्य ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मन्दिरनिर्माणावसरे योग्यभूमेः आवश्यकतां, भूमेः भेदांश्च वर्णयितुं शक्ष्यन्ति।
2. देवालयारम्भमुहूर्तः, शिलान्यासविधिः इत्यादिविषयान् सुष्ठु प्रतिपादयिष्यन्ति।
3. प्रतिष्ठानिर्वचनं, प्रतिष्ठागतानां च नैकविषयाणां विश्लेषणं करिष्यन्ति।
4. जीर्णोद्धारशब्दार्थं, मन्दिरे विभिन्नजीर्णद्रव्याणां च स्वरूपं निरूपयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.6	मन्दिरनिर्माणं जीर्णोद्धारश्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भूमिचयनम्। **श्रेयोऽङ्कः १**

- देवालयार्थं प्रशस्तभूमिः।
- भूमिचयनस्य वास्तुशास्त्रीयविधयः।
- ग्रामनगरादिषु देवालयस्थानम्।

अन्वितिः २. देवालयारम्भः निर्माणञ्च। **श्रेयोऽङ्कः १**

- देवालयारम्भमुहूर्तः।
- गर्भविन्यासः।
- शिलान्यासविधिः।
- शल्योद्धारः।

- प्रस्तरदेवालयः।
- गर्भगृहं मण्डपञ्च।
- गोपुरविधानम्।
- इष्टिकालक्षणम्।
- गुहास्थापत्यम्।

अन्वितिः ३. प्रतिष्ठाविधानम्। **श्रेयोऽङ्कः १**

- प्रतिमास्थापनम्।
- प्रतिष्ठामुहूर्तः।
- प्रतिष्ठाविधिः।

अन्वितिः ४. जीर्णोद्धारविधानम्। **श्रेयोऽङ्कः १**

- अनुकर्मपरिचयः।
- बालालयस्थापनम्।
- धातुजप्रतिमाजीर्णोद्धारः।
- प्रतिमास्थानपरिवर्तने विधिनिषेधः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पाठक, गणेशदत्त (टीकाकार), *विश्वकर्माप्रकाश*, वाराणसी : श्री ठाकुर प्रसाद पुस्तक भण्डार।
2. *प्रतिष्ठाविधिदर्शनः*, तिरुपतिः : श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः।
3. पाण्डेय, शैलजा (टीकाकार), *मयमत*, वाराणसी : चौखम्भा सुरभारती प्रकाशन।
4. डेगेंस, ब्रूनो (टीकाकार), *मयमत*, वाराणसी : मोतीलाल बनारसीदास प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. द्विवेदी, रामनिहोर, श्री, *बृहद्वास्तुमाला*, वाराणसी : चौखम्बा सुरभारती ग्रन्थमाला।
2. जुगनू, श्रीकृष्ण, डॉ. (सम्पादन), *देवतामूर्तिप्रकरण*, नई दिल्ली : न्यू भारतीय बुक कार्पोरेशन।
3. रघुनाथाचार्युलु, एस. बी., *क्रियाकैरवचन्द्रिका*, तिरुपतिः : पद्मश्री पब्लिसर्श।
4. जुगनू, श्रीकृष्ण, डॉ. (सम्पादन), (2005), *वास्तु एवं शिलाचयन*, नई दिल्ली : न्यू भारतीय बुक कार्पोरेशन।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.7: मन्दिरप्रकाराः मण्डपसभादिविधानञ्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. देवालयानामङ्गानां ज्ञानप्रदानम्।
2. देवालयभेदानां ज्ञानप्रदानम्।
3. मण्डपविधानस्य परिज्ञानम्।
4. शालाविधानस्य सभाविधानस्य च ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. देवालयानां विविधाङ्गानां वर्णनं कर्तुं समर्थाः भविष्यन्ति।
2. मण्डपलक्षणप्रयोजनादिकं वक्तुं शक्ष्यन्ति।
3. एकशालादिवास्तुभेदाः, सोपानभेदाः इत्यादिविचारान् प्रतिपादयिष्यन्ति।
4. न्यायसभादिषु देवस्वरूपम् इत्यादि विषयवर्णने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.7	मन्दिरप्रकाराः मण्डपसभादिविधा	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. देवालयभेदाः अङ्गानि च। **श्रेयोऽङ्कः १**

- मेरु-मन्दरादिभेदानां लक्षणम्।
- भूमि-छन्द-कपोतपाली-शुकनासादि-अङ्गानां परिचयः।

अन्वितिः २. मण्डपविधानम्। **श्रेयोऽङ्कः १**

- मण्डपप्रयोजनम्।
- मण्डपलक्षणम्।
- प्रपा-रङ्गमण्डप-जलक्रीडामण्डप-सर्वतोभद्र-यज्ञमण्डपादिविविधमण्डपप्रकाराः।
- महामण्डपार्द्धमण्डपादिभेदाः।

अन्वितिः ३. शालाविधानम्। **श्रेयोऽङ्कः १**

- एकशालादिवास्तुभेदाः, सोपानभेदाः।
- भिन्नाभिन्नगृहम्, अलिन्दः मूषा च।
- शिखरविधानम्।
- नागरशिखरे कलश-आमलकादीनि अङ्गानि।
- द्राविडशिखरे स्तूपिकादीनि अङ्गानि।

अन्वितिः ४. सभाविधानम्। **श्रेयोऽङ्कः १**

- प्राचीनसभाभेदाः।
- न्यायसभादिषु देवस्वरूपम्।
- सिंहासनलक्षणम्।
- सभागारस्य वर्तमाननिर्माणयोजनाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जुगनू, श्रीकृष्ण, *विश्वकर्मवास्तुशास्त्र*, दिल्ली : परिमल संस्कृत ग्रन्थमाला।
2. पाण्डेय, शैलजा (टीकाकार), *मयमत*, वाराणसी : चौखम्भा सुरभारती प्रकाशन।
3. झा, अच्युतानन्द (टीकाकार), *बृहत्संहिता* (वराहमिहिर), वाराणसी : चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. Panda, N. C., Prof., Reddy, E. Shiva Nagi, *Temple Architecture of India*, New Delhi : B0hartiya Kala Prakashan.
2. उपाध्याय, वासुदेव, डॉ., (2008), *प्राचीन भारतीय स्तूप गुहा एवं मंदिर*, पटना : बिहार हिन्दी ग्रन्थ अकादमी।
3. जुगनू, श्रीकृष्ण, डॉ., (2015), *देवालय चन्द्रिका*, दिल्ली : परिमल पब्लिकेशंस।

द्वितीयवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

तृतीयसत्रार्द्धः (Semester – 3)

प्रधानः पाठ्यक्रमः (Major) 2.1: बृहद्देवालये उपमन्दिराणि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. बृहद्देवालयस्य ज्ञानप्रदानम्।
2. पञ्चायतनदेवानां परिज्ञानम्।
3. देवालये स्थितानाम् उपमन्दिराणां ज्ञानप्रदानम्।
4. उपमन्दिराणां विवरणस्य ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. देवतापरिवारपरिचयं वर्णयिष्यन्ति।
2. पञ्चायतनानां विवरणं वक्तुं शक्ष्यन्ति।
3. भक्त-बेरलक्षणं, गरुडस्तम्भः इत्यादिविषयान् प्रतिपादयिष्यन्ति।
4. देवालयपरिसरे उपमन्दिरव्यवस्थां वर्णयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	बृहद्देवालये उपमन्दिराणि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. देवतापरिवारपरिचयः। **श्रेयोऽङ्कः १**

- शिवपरिवारः।
- विष्णुपरिवारः।
- ब्रह्मादिदेवानां परिवाराः, वाहनानि च।
- ध्वजाः।

अन्वितिः२. पञ्चायतनपरिचयः। **श्रेयोऽङ्कः १**

- पञ्चायतनस्य अवधारणा।

- गणेशादिपञ्चायतनव्यवस्था।
- देवालयनिर्माणयोजनायां पञ्चायतनशैली।

अन्वितिः ३. भक्तबेरविधानम्। **श्रेयोऽङ्कः १**

- भक्त-बेरलक्षणम्।
- गरुडस्तम्भः।
- नन्दीमण्डपम्।
- हनूमतः मन्दिरम्।
- भक्तप्रतिमामण्डपादीनां स्थापनम्।

अन्वितिः ४. देवालयपरिसरे उपमन्दिरव्यवस्था। **श्रेयोऽङ्कः १**

- नवग्रहगणदेवताः।
- योगिनी-भैरवादीनाम् उपमन्दिराणि।
- आञ्जनेय-हयग्रीवादीनाम् उपमन्दिराणि।
- वाहनमण्डपम्।
- उपमन्दिराणां वैशिष्ट्यम्।
- सम्मर्दप्रबन्धने चिह्नबोधे च उपमन्दिराणां भूमिका।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जुगनू, श्रीकृष्ण, *विश्वकर्मवास्तुशास्त्र*, दिल्ली : परिमल पब्लिकेशन।
2. पाण्डेय, शैलजा (टीकाकार), *मयमत*, वाराणसी : चौखम्भा सुरभारती प्रकाशन।
3. Haware, Suresh, Dr., *Temple Management*, New Delhi : Prabhat Prakashan Pvt. Ltd.

सहायकाः ग्रन्थाः (Additional Readings)

1. जुगनू, श्रीकृष्ण, डॉ. (सम्पादन), *देवतामूर्तिप्रकरण*, नई दिल्ली : न्यू भारतीय बुक कार्पोरेशन।
2. सिन्हा, कमलेश, श्रीमती, चन्द्र, दिनेश, डॉ., (1990), *भारतीय प्रतिमा विज्ञान*, नई दिल्ली : अयन प्रकाशन।
3. सूर्यकान्त, डॉ., (2006), *वैदिक देवशास्त्र*, नई दिल्ली : मेहरचन्द लछमनदास पब्लिकेशंस।
4. Durai Swamy, Deepa, Dr., *Temple Management in the Agamas*, INDICA.

काठिन्यस्तरः 200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: विविधधार्मिकसम्प्रदायानां परिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. सम्प्रदायनिर्वचनानां तद्भेदानाञ्च ज्ञानप्रदानम्।
2. शैवसम्प्रदायानां परिज्ञानम्।
3. वैष्णवसम्प्रदायानां परिज्ञानम्।
4. शाक्तादिसम्प्रदायानां परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतदेशस्य वैभवप्रतिपादने सम्प्रदायानां निर्वचनानि वर्णयिष्यन्ति।
2. शैवसम्प्रदायानां परम्परां नियमांश्च वक्तुं शक्ष्यन्ति।
3. वैष्णवसम्प्रदायानां परम्परायाः नियमानां च वर्णनं कर्तुं सिद्धाः भविष्यन्ति।
4. शाक्तादिसम्प्रदायानां परिचयं प्रदातुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	विविधधार्मिकसम्प्रदायानां परिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सम्प्रदायानामावधारणा आगमपरम्परा च। **श्रेयोऽङ्कः १**

- सम्प्रदायनिर्वचनानि।
- सम्प्रदायभेदेषु धार्मिक-दार्शनिक-सामाजिकाधाराः।
- वैष्णव-शैव-शाक्तागमानां परिचयः।

अन्वितिः २. शैवसम्प्रदायानां परम्परा नियमाश्च। **श्रेयोऽङ्कः १**

- शाङ्करसम्प्रदायः।
- पाशुपतसम्प्रदायः।

- काश्मीरशैवसम्प्रदायः।
- वीरशैवसम्प्रदायः।
- लकुलीशसम्प्रदायः।

अन्वितिः ३. वैष्णवसम्प्रदायानां परम्परा नियमाश्च। **श्रेयोऽङ्कः १**

- रामानुजसम्प्रदायः।
- पाञ्चरात्रसम्प्रदायः।
- वैखानससम्प्रदायः।
- निम्बार्कसम्प्रदायः।
- वल्लभसम्प्रदायः।
- राधावल्लभसम्प्रदायः।
- गौडीयसम्प्रदायः।

अन्वितिः ४. शाक्तादिसम्प्रदायानां परम्परा नियमाश्च। **श्रेयोऽङ्कः १**

- शाक्तसम्प्रदायः।
- बङ्गप्रदेशे गुर्जरादौ च शक्त्याराधनपरम्परा।
- गाणपत्यसम्प्रदायः।
- नाथसम्प्रदायः।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts):

1. वेदांती, हरिशंकरदास, महन्त (सम्पादन), *चतुः सम्प्रदाय दिग्दर्शन*, जयपुर : हंसा प्रकाशन।
2. रङ्गरामानुजाचार्य, पि. टि. जि., डॉ. (सम्पादन), (2009), *श्रीपरमपुरुषसंहिता*, तिरुपति : नव्यश्री पब्लिकेशंस।

सहायकाः ग्रन्थाः (Additional Readings)

1. Temple Management in the Agamas, Dr Deepa Durai Swamy, INDICA

काठिन्यस्तरः 200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: अर्चनाविधानम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मन्दिरेषु प्रचलितानामर्चापद्धतेः ज्ञानप्रदानम्।
2. अभिषेकविधानस्य ज्ञानप्रदानम्।
3. अलङ्कारविधानस्य ज्ञानप्रदानम्।
4. धूपदीपनैवेद्यादीनां पद्धतेः ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मन्दिरेषु प्रचाल्यमानानाम् अर्चनापद्धतीनां वर्णने समर्थाः भविष्यन्ति।
2. अभिषेकविधीनां निरूपणं कर्तुं शक्ष्यन्ति।
3. शैववैष्णवमन्दिरेषु आलङ्कारिकपद्धतीनां विशेषेण वर्णनं कर्तु शक्ष्यन्ति।
4. धूपदीपनैवेद्यादीनां विधेः निरूपणं करिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	अर्चनाविधानम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मन्दिरेषु प्रचाल्यमानाः अर्चनापद्धतयः। **श्रेयोऽङ्कः १**

- त्रिविधोपचाराः।
- पञ्चोपचाराः।
- दशोपचाराः।
- षोडशोपचाराः।
- एकविंशत्युपचाराः।
- द्वात्रिंशदुपचाराः।
- चतुष्षष्ट्युपचाराः।
- राजोपचाराः।
- मानसोपचारः।
- वैदिक-पौराणिकमन्त्राः।
- सम्प्रदायिकस्तोत्राणि।

अन्वितिः २. अभिषेकनिरूपणम्। **श्रेयोऽङ्कः १**

- शुद्धोदकाभिषेकः।
- पञ्चामृतादिना स्नपनम्।
- स्नपनभेदाः स्नपनद्रव्याणि च।
- पञ्च-नव-द्वादश-एकविंशति-एकाशीति-अष्टोत्तरशत-सहस्रकलशैरभिषेकविधयः।
- रुद्राभिषेकविधिः।
- वैष्णवादिप्रतिमानाम् अभिषेकविधिः।

अन्वितिः ३. अलङ्कारविधानम्। **श्रेयोऽङ्कः १**

- ऊर्ध्वपुण्ड्र-तिर्यक्पुण्ड्रादितिलकधारणे प्रकाराः।
- विविधसम्प्रदायेषु तिलकधारणपद्धतयः।
- चन्दन-कुङ्कुमादितिलकसामग्रीणां कथनम्।
- वस्त्रधारणविधयः।
- केशसंवर्धशैलीपद्धतयः।
- बहुविधपुष्पैरलङ्कारनिरूपणकथनम्।

अन्वितिः ४. धूपदीपनैवेद्यादीनां विधिः। **श्रेयोऽङ्कः १**

- अष्टगन्ध-धूप-अमनिया-भोग-प्रसाद-नीराजनादिपारिभाषिकशब्दानां विवरणम्।
- दीपदण्डः दीपसंरचना च।
- नैवेद्यफलादीनां समर्पणविधिः।
- मङ्गला-शृङ्गार-भोग-सन्ध्या-शयनादिनीराजनानां भेदाः।
- महाकालभस्म – आरार्तिक्यम्।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts)

1. रङ्गरामानुजाचार्य, पि. टि. जि., डॉ. (सम्पादन), (2009), *श्रीपरमपुरुषसंहिता*, तिरुपति : नव्यश्री पब्लिकेशंस।
2. उत्तरप्रदेश संस्कृत संस्थान, *पौरोहित्य कर्म प्रशिक्षक*, लखनऊ : उत्तरप्रदेश संस्कृत संस्थान।
3. गीताप्रेस, *नित्यकर्मपूजाप्रकाश*, गोरखपुर : गीताप्रेस।
4. द्विवेदः, व्रजवल्लभ, आचार्य श्री, *वैष्णवागमविमर्शः*, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालयः।

5. सुब्बय्यशर्मा, पि., *आगमिक शिवार्चनपद्धतिः*, विजयवाडा।

सहायकाः ग्रन्थाः (Additional Readings)

1. Temple Management in the Agamas, Dr Deepa Durai Swamy, INDICA

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

चतुर्थसत्रार्द्धः (Semester – 4)

प्रधानः पाठ्यक्रमः (Major) 2.4: अर्चकपरिचारकाणां व्यवस्था

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अर्चकानां व्यवस्थायाः ज्ञानप्रदानम्।
2. धर्माधिकारिणां प्रबन्धकानाञ्च भूमिकायाः परिज्ञानम्।
3. दर्शननैवेद्यादीनां व्यवस्थापकानां भूमिकायाः ज्ञानप्रदानम्।
4. पाचकादिसर्वविधपरिचारकसुरक्षकादीनां व्यवस्थापनज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भगवन्मन्दिरे अर्चकाणां लक्षणार्हतादिविषयान् प्रतिपादयिष्यन्ति।
2. धर्माधिकारिणाम् अन्येषां प्रबन्धकानां च भूमिकावर्णने समर्थाः भविष्यन्ति।
3. देवालये सर्वविधदर्शननैवेद्यादीनां व्यवस्थायाः विश्लेषणं कर्तुं शक्ष्यन्ति।
4. देवालयस्याभिवृद्धये सर्वविधपरिचारकाणां लक्षण-कर्त्तव्यानि निरूपयिष्यन्ति।
5. अर्चकानां, मन्दिरपरिचारकाणां, पचाकादीनाञ्च कृते सशुल्कं प्रशिक्षणकेन्द्रं प्रारब्धुं समर्थाः भविष्यन्ति।
6. देवताभेदेन पूजनपद्धतिभेदात् तत्प्रशिक्षणकार्यशालानां समायोजनार्थं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.4	अर्चकपरिचारकाणां व्यवस्था	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. अर्चकलक्षणं कर्माणि च। **श्रेयोऽङ्कः १**

- अर्चकस्य लक्षणानि।
- अर्चकार्हता।
- अर्चकस्य कर्त्तव्यं महत्त्वञ्च।

अन्वितिः २. प्रबन्धकलक्षणानि, कर्त्तव्यानि च। **श्रेयोऽङ्कः १**

- स्थानाचार्यलक्षणानि।
- मुख्यप्रबन्धककोशाधिकारिणां कर्त्तव्यविधयः।
- सुप्रबन्धने भगवदुपचाराणां ज्ञानम्।

अन्वितिः ३. पाचकादीनां लक्षणानि नैवेद्यव्यवस्था च। **श्रेयोऽङ्कः १**

- पाचकादीनां लक्षणानि।
- भगवत्तीर्थप्रसादादीनां महिमा।
- नैवेद्यनिर्माणे शुद्धाशुद्धविचारः।

अन्वितिः ४. परिचारकलक्षणानि कर्त्तव्यानि च। **श्रेयोऽङ्कः १**

- मालाकार-वादक-वेत्रहस्त-गोपाल-स्थानसंशोधकादिसर्वविधपरिचारकानां नियोजनम्।
- परिचारकलक्षणानि।
- परिचारकस्यार्हता।
- निर्माणे उत्सवादौ च सेवाकार्यस्य माहात्म्यम्।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts)

1. राय, रामकुमार, (1985), *नारद पंचरात्र*, वाराणसी : प्राच्य प्रकाशन।
2. शर्मा, पं.शिवदत्त, (1995), *आह्निककर्म्म सूत्रावली*, पुणे : श्रीवेङ्कटेश्वर प्रेस।
3. उपाध्याय, डॉ. रामराज, (2004), *मनोभिलषितव्रतानुवर्णनम्*, मायापुरी : मान्यता प्रकाशन।
4. रङ्गरामानुजाचार्य, डॉ. पि. टि. जि., (सम्पादक), (2009), *श्रीपरमपुरुषसंहिता*, तिरुपति : नव्यश्री पब्लिकेशंस।

सहायकाः ग्रन्थाः (Additional Readings)

1. मिश्र, शिवशंकर, डॉ., (2018), *भारतीय चिन्तन परम्परा में धर्म*, दिल्ली : ईस्टर्न बुक लिंकर्स।

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.5: ज्यौतिषशास्त्रपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ज्यौतिषशास्त्रस्य ज्ञानप्रदानम्।
2. फलितज्यौतिषविवेचनम्।
3. शुभाशुभमुहूर्तनिरूपणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ज्यौतिषशास्त्रस्य स्वरूपं प्रतिपादयितुं शक्ष्यन्ति।
2. राशि-ग्रहादीनां परिचयं वक्तुं शक्ष्यन्ति।
3. शुभाशुभमुहूर्तविचारान् वर्णयितुं समर्थाः भविष्यन्ति।
4. मुहूर्तशास्त्रे नक्षत्रविचारं विधाय तत्प्रतिपादने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.5	ज्यौतिषशास्त्रपरिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ज्यौतिषशास्त्रस्य परिचयः स्वरूपं क्षेत्राणि च। **श्रेयोऽङ्कः १**

- ज्योतिषशब्दस्य व्युत्पत्तिः परिभाषा च।
- त्रिस्कन्धभेदाः (सिद्धान्तः, संहिता, होरा)
- पञ्चाङ्गपरिचयः (तिथिः, वारः, नक्षत्रं, योगः, करणम्)

अन्वितिः २. फलितविवेकः। **श्रेयोऽङ्कः १**

- राशीनां विवेचनम्।
- ग्रहाणां परिचयः।
- भावफलविवेचनम्।

अन्वितिः ३. मुहूर्तविवेकः। **श्रेयोऽङ्कः १**

- तिथिस्वामी, नन्दादिसञ्ज्ञा।
- सिद्धियोगाः।
- आनन्दादियोगाः।
- रवियोगः।
- शुभकार्येषु वर्ज्यकालः।
- होलिकाष्टकः।
- भद्राविचारः।
- गुरुशुक्रास्ते वर्जितकार्याणि।

अन्वितिः ४. मुहूर्तशास्त्रे नक्षत्रविचारः। **श्रेयोऽङ्कः १**

- नक्षत्रस्वामी।
- ध्रुवादिसञ्ज्ञा।
- नववस्त्रधारणविचारः अन्धादिसञ्ज्ञा।
- लग्नशुद्धिः।
- होमाहुतिविचारः अग्निवासश्च।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts):

1. शास्त्री, कपिलेश्वर (टीकाकार), *जातकपारिजातः* (वैद्यनाथ), वाराणसी : चौखम्बा प्रकाशन।
2. पाण्डेय, कमलाकान्त (टीकाकार), *लघुजातकम्* (वराहमिहिरः), वाराणसी : चौखम्बा सुरभारती प्रकाशन।
3. जोशी, केदारदत्त (टीकाकार), *मुहूर्तचिन्तामणिः* (श्रीरामाचार्यः), दिल्ली : मोतीलाल बनारसीदास प्रकाशन।
4. मिश्र, डॉ.सुरेशचन्द्र, (टीकाकार), *मुहूर्तचिन्तामणिः* (श्रीरामाचार्यः), दिल्ली : रंजन पब्लिकेशन्स।

सहायकाः ग्रन्थाः (Additional Readings)

1. शर्मा, डॉ.शुभम्, कुमार, डॉ. विजय, (2020), *मुहूर्तशास्त्र*, उज्जैन : महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय।

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.6: मन्दिरेषु पर्वनिर्वाहः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. धर्मशास्त्रस्य ज्ञानप्रदानम्।
2. पर्वदिनानां निर्वहणे धर्मशास्त्रोक्तरीत्या तिथिनिर्णयस्य ज्ञानप्रदानम्।
3. देवालयीयानां मुख्यव्रतानां परिज्ञानम्।
4. प्रमुखव्रतपर्वोत्सवानां निर्णयस्य ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. धर्मशास्त्रपरिचयं वक्तुं समर्थाः भविष्यन्ति।
2. पर्वदिनानां निर्वहणे धर्मशास्त्रोक्तरीत्या तिथिनिर्णये प्रमुखसिद्धान्तान् वर्णयिष्यन्ति।
3. देवालयीयानि मुख्यव्रतानि निरूपयिष्यन्ति।
4. प्रमुखव्रतपर्वोत्सवानां निर्णयविश्लेषणं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.6	मन्दिरेषु पर्वनिर्वाहः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. धर्मशास्त्रपरिचयः। **श्रेयोऽङ्कः १**

- धर्मस्यावधारणा।
- वेद-पुराण-धर्मशास्त्राणां सामान्यपरिचयः।
- मनुस्मृति-याज्ञवल्क्यस्मृति-पराशरस्मृत्यादीनां सामान्यपरिचयः।
- स्त्रीधर्माः।
- पञ्चमहायज्ञानां निरुपणम्।
- पुरुषार्थचतुष्टयपरिचयः।

अन्वितिः २. तिथिनिर्णयः। **श्रेयोऽङ्कः १**

- तिथिनिर्णये प्रमुखसिद्धान्ताः।
- विशिष्टतिथिपर्वनिर्णयः।
- सङ्क्रान्तिविचारः पुण्यकालश्च।
- ग्रहणवेधादिविचारः।

अन्वितिः ३. प्रमुखव्रतानां परिचयः। **श्रेयोऽङ्कः १**

- मासानुसारव्रतानां माहात्म्यम्।
- एकादशीव्रतम्।
- सङ्कष्टीव्रतम्।
- प्रदोषव्रतम्।
- श्रावणादिमासमाहात्म्यानां सङ्क्षिप्तपरिचयः।

अन्वितिः ४. प्रमुखव्रतपर्वणां निर्णयः। **श्रेयोऽङ्कः १**

- नवरात्रिव्रतं, रामनवमी, अक्षयतृतीया, गङ्गादशहरा, वटसावित्रीव्रतं, रथयात्रा च।
- देवशयनं, नागपञ्चमी, रक्षाबन्धनं, श्रीकृष्णजन्माष्टमी, हरितालिका, गणेशजन्मोत्सवश्च।
- जीवित्पुत्रिकाव्रतं, महाष्टमी, महानवमी, विजयादशमी, शतचण्डीविधानं, दीपावल्युत्सवश्च।
- अन्नकूटोत्सवः, गोवर्धनपूजा, यमद्वितीया, देवप्रबोधिनी, कालाष्टमी, हनुमज्जयन्ती, छठपूजा च।
- वसन्तपञ्चमी, महाशिवरात्रिः, होलिकापर्व, सूर्यषष्ठीव्रताचारादयः।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts)

1. पाण्डेय, रामचंद्र, प्रो. (व्याख्या), *ज्योतिर्विदाभरणम्* (कालिदासः), वाराणसी : मोतीलाल बनारसीदास।
2. मिश्र, ज्वालाप्रसाद, पं. (टीकाकार), *निर्णयसिन्धुः* (कमलाकरभट्टः), मुंबई : खेमराज श्रीकृष्णदास।
3. शर्मा, विकास, डॉ., *तिथि निर्णय के प्रमुख सिद्धांत एवं विशिष्ट तिथि पर्व निर्णय*, जयपुर : हंसा प्रकाशन।
4. उपाध्याय, रामराज, डॉ., (2004), *मनोभिलषितव्रतानुवर्णनम्*, नई दिल्ली : मान्यता प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. शर्मा, माधवाचार्य, पं., (1989), *श्रीव्रतराज*, मुंबई : खेमराज श्रीकृष्णदास।
2. महथा, निवारण, डॉ., (2017), *व्रतकथामृतम्*, दिल्ली : ईस्टर्न बुक लिंकर्स।

तृतीयवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः 300-399

श्रेयोऽङ्काः - 4
होराः - 60

पञ्चमसत्रार्द्धः (Semester - 5)

प्रधानः पाठ्यक्रमः (Major) 3.1: मन्दिरसम्बद्धानां पुष्करिण्याऽऽरामाणां परिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयज्ञानपरम्परायां जलतत्त्वचिन्तनम्।
2. नदनदीजलाशयानां ज्ञानप्रदानम्।
3. मन्दिरसम्बद्धपुष्करिणीनां सम्बन्धस्य ज्ञानप्रदानम्।
4. विभिन्नारामाणां परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयज्ञानपरम्परायां जलतत्त्वचिन्तनविचारान् वक्तुं समर्थाः भविष्यन्ति।
2. जलाशयादीनां प्रकारः तत्संरक्षणविधीनां च निरूपणं कर्तुं शक्ष्यन्ति।
3. मन्दिरजलाशययोः सम्बन्धनिरूपणं करिष्यन्ति।
4. वृक्षारोपणमहत्त्वं वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.1	मन्दिरसम्बद्धानां पुष्करिण्याऽऽरामाणां परिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भारतीयज्ञानपरम्परायां जलतत्त्वचिन्तनम्। **श्रेयोऽङ्कः १**

- वैदिकवाङ्मये जलविचारः।
- इन्द्रसूक्त-पर्जन्यसूक्त-नदीसूक्तादिषु जलचिन्तनम्।
- पुराणेषु जलमहिमा।
- नदनदीनां परिचयः।
- गङ्गा-यमुना-कावेरी-कृष्णा-गोदावरी-ब्रह्मपुत्र-नर्मदा-गण्डक्यादयः पुण्यसरितः।
- जलमङ्गलानुसारं नदीजलस्य गुणधर्माः।

अन्वितिः २. जलाशयविमर्शः। **श्रेयोऽङ्कः १**

- कूप-सर-कुण्ड-तटाक-वाप्यादिप्रकाराः।
- जलाशयनिर्माणस्य संरक्षणस्य च फलम्।
- नीराजनविधौ अर्घ्यदाने अभिषेकविधौ च जलविमर्शः।
- मधुर-क्षार-नादेय-आन्तरिक्षोदक-तटाक-कूपोदकादिना जलस्य गुणधर्माः।

अन्वितिः ३. मन्दिरजलाशययोः सम्बन्धः। **श्रेयोऽङ्कः १**

- काशीविश्वनाथमन्दिरे ज्ञानवापी।
- महाकालमन्दिरे कोटितीर्थम्।
- त्रयम्बकेश्वरपरिसरे ब्रह्मावर्तकुण्डम्।
- मीनाक्षीमन्दिरे कन्यापुष्करिणी।
- तिरुमलायां स्वामिपुष्करिणी।
- श्रीरङ्गे चन्द्रपुष्करिणी।
- काञ्चीपुरे गजेन्द्रपुष्करिणी।
- तिरुनारायणक्षेत्रे ज्ञानपुष्करिणी।
- रामेश्वरमन्दिरे नवविधकूपाः।
- कपिलमन्दिरे बिन्दुसरोवरः।
- गोवर्धनपर्वते मानसीगङ्गा।
- ब्रह्मामन्दिरस्थः पुष्करसरः इत्यादयः।

अन्वितिः४. आरामविमर्शः। **श्रेयोऽङ्कः १**

- वृक्षारोपणमहत्त्वम्।
- उद्याननिर्माणस्य संरक्षणस्य च फलम्।
- मन्दिरपरिसरे पुष्पवाटिका।
- तुलसी-चन्दन-फलोद्यानादीनां धार्मिकव्यावहारिकोपयोगिता।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts)

1. *ऋग्वेद*, वाराणसी : चौखम्बा प्रकाशन।
2. *यजुर्वेद*, वाराणसी : चौखम्बा प्रकाशन।
3. *स्कन्दपुराण*, गोरखपुर : गीताप्रेस।
4. *महाभारत*, गोरखपुर : गीताप्रेस।
5. द्विवेदी, शिवप्रसाद, आचार्य (टीकाकार), *विष्णुधर्मोत्तर पुराण*, वाराणसी : चौखम्भा सुरभारती प्रकाशन।
6. भोजदेव, *चारुचर्या*, उज्जैन : महाराजा विक्रमादित्य शोधपीठ।

सहायकाः ग्रन्थाः (Additional Readings)

1. नारदपुराण, गोरखपुर : गीताप्रेस।

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.2: मन्दिरपरिसराणां विकासप्रबन्धनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. प्राचीनकाले मन्दिरपरिसराणां विकासप्रबन्धनस्य ज्ञानप्रदानम्।
2. मन्दिरपरिसरे पारम्परिकविभिन्नशालानां विवरणम्।
3. देवालये ध्वजस्तम्भादीनां विशेषविवरणम्।
4. यज्ञशालायाः स्वरूपं विभिन्नयज्ञकुण्डानां स्वरूपनिरूपणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्राचीनकाले मन्दिरपरिसराणां विकासप्रबन्धनं विज्ञाय प्रतिपादयिष्यन्ति।
2. मन्दिरपरिसरे पारम्परिकविभिन्नशालानां विवरणम् प्रदातुं शक्ष्यन्ति।
3. देवालये यागशाला-विविधयागकुण्डानां नामानि तेषां प्रकारांश्च वर्णयितुं समर्थाः भविष्यन्ति।
4. मन्दिरपरिसरसौन्दर्यं व्याख्यास्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.2	मन्दिरपरिसराणां विकासप्रबन्धनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्राचीनकाले मन्दिरपरिसराणां विकासः। **श्रेयोऽङ्कः १**

- गर्भगृह-विभिन्नमण्डप-परिक्रमापथ-सभाभवन-प्राकार-गोपुर-मार्ग-प्रणाल्यादेः योजना सौन्दर्यविधानञ्च।
- ध्वजपताकादीनां परिचयः महत्त्वञ्च।
- कीर्तिस्तम्भपरिचयः गरुडस्तम्भः दीपस्तम्भाश्च।

अन्वितिः २. विविधाः पारम्परिकशालाः। **श्रेयोऽङ्कः १**

- पाकशाला।
- भोजनशाला।
- विद्याशाला।
- ग्रन्थशाला।
- गोशाला।
- गजशाला।
- अश्वशाला।
- वाहनस्थानम्।

अन्वितिः ३. यज्ञशालाविधानम्। **श्रेयोऽङ्कः १**

- यज्ञशालामहत्त्वम्।
- यागशालानिर्माणयोजना च।
- कुण्डलक्षणम्।
- सर्वतोभद्रादिमण्डलानि।
- सामान्यहवनविधिः।

अन्वितिः ४. परिसरसौन्दर्यम्। **श्रेयोऽङ्कः १**

- मन्दिरपरिसरे पुष्पवाटिका, ग्रहवाटिका, नक्षत्रवाटिका च।
- देवालये विद्युद्दीपानां सौन्दर्यम्।
- परिचयफलकानि।
- जलपल्वलप्रबन्धनम्।
- प्रकाशध्वनिप्रदर्शनम् (Light & Sound Show)
- महाकाललोकादेः अवधारणा।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts)

1. जुगनू, श्रीकृष्ण, *अपराजितपृच्छा*, दिल्ली : परिमल संस्कृत ग्रंथमाला।
2. जुगनू, श्रीकृष्ण, *विश्वकर्मवास्तुशास्त्र*, दिल्ली : परिमल संस्कृत ग्रंथमाला।
3. सहाय, डॉ. सच्चिदानन्द, *मन्दिर स्थापत्य का इतिहास*, बिहार : हिन्दी ग्रन्थ अकादमी।
4. द्विवेदी, भोजराज, *यज्ञकुण्डमण्डपसिद्धिः*, दिल्ली : डायमण्ड पाकेट बुक्स।
5. कात्यायन, महर्षि अभय, *विश्वकर्मप्रकाश*, (2019), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. Swamy, Dr. Deepa Durai, *Temple Management in the Agamas*, INDICA.
2. Haware, Dr. Suresh, *Temple Management*, Prabhat Prakashan Pvt. Ltd

काठिन्यस्तरः 300-399

श्रेयोऽङ्काः - 4
होराः - 60

षष्ठसत्रार्द्धः (SEMESTER – 6)

प्रधानः पाठ्यक्रमः (Major) 3.3: पुण्यतीर्थक्षेत्रेषु मन्दिराणां परस्परसमन्वयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. तीर्थक्षेत्राणां ज्ञानप्रदानम्।
2. उत्तरभारतस्य प्रमुखतीर्थानां परिज्ञानम्।
3. पूर्वभारतस्य प्रमुखतीर्थानां परिज्ञानम्।
4. दक्षिणभारतस्य प्रमुखतीर्थानां परिज्ञानम्।
5. पश्चिमभारतस्य प्रमुखतीर्थानां परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतदेशस्थसर्वविधतीर्थानां तीर्थक्षेत्रस्य परिभाषा महत्त्वञ्च वक्तुं समर्थाः भविष्यन्ति।
2. उत्तरभारते पूर्वभारते च प्रमुखतीर्थपरिक्षेत्राणि निरूपयिष्यन्ति।
3. दक्षिणभारतस्य प्रमुखतीर्थाक्षेत्राणां वर्णनं करिष्यन्ति।
4. पश्चिमभारतस्य प्रमुखतीर्थानां विश्लेषणं करिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.3	पुण्यतीर्थक्षेत्रेषु मन्दिराणां परस्परसमन्वयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. तीर्थविमर्शः । **श्रेयोऽङ्कः १**

- तीर्थक्षेत्रस्य परिभाषा महत्त्वञ्च।
- तीर्थयात्रायाः माहात्म्यम्।
- महाभारते विभिन्नतीर्थक्षेत्रसंसेवनप्रसङ्गः।
- पुराणेषु विभिन्नतीर्थसंक्षेत्रसंसेवनप्रसङ्गः।

अन्वितिः २. उत्तरभारते पूर्वभारते च प्रमुखतीर्थपरिक्षेत्राणि। **श्रेयोऽङ्कः १**

- अयोध्या।
- ब्रजमण्डलम्।

- हरिद्वार-कुरुक्षेत्र-काशी-नैनादेव्यादयः।
- ज्वालादेवी-चिन्तपूर्ण्यादि उत्तरभारतीयतीर्थानि।
- गया-वैद्यनाथ-कोलकाता-त्रिपुरेश्वरी-कामाख्यादयः।
- जगन्नाथपुरीकोणार्कादिपूर्वभारतीयतीर्थानि।

अन्वितिः३. दक्षिणभारते प्रमुखतीर्थपरिक्षेत्राणि। **श्रेयोऽङ्कः १**

- काञ्ची, शृङ्गेरी, तिरुमला, भीमशङ्करः, श्रीरङ्गम्, रामेश्वरम्।
- कन्याकुमारी, अनन्तपद्मनाभक्षेत्रं, गुरुवायूर, रजतपीठपुरक्षेत्रम् (Udupi)
- शबरिमलै, सिंहाचलम्, अन्तर्वेदि, भद्राचलम्।
- अहोबिलं, तिरुनारायणपुरादिमन्दिराणि।

अन्वितिः४. पश्चिमभारते मध्यभारते च प्रमुखतीर्थपरिक्षेत्राणि। **श्रेयोऽङ्कः १**

- पुष्करमण्डलं, द्वारिका, प्रभास, मुम्बई।
- नासिकमण्डलादिपश्चिमभारतीयतीर्थानि।
- अवन्तीपरिक्षेत्रम्, ओङ्कारेश्वरं, चित्रकूटम्, मैहर।
- अमरकण्टकादिमध्यभारतीयतीर्थानि।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts)

1. *महाभारत*, गोरखपुर : गीताप्रेस।
2. *स्कन्दपुराण*, गोरखपुर : गीताप्रेस।
3. *पद्मपुराण*, गोरखपुर : गीताप्रेस।
4. *श्रीमद्भागवत महापुराण*, गोरखपुर : गीताप्रेस।
5. द्विवेदी, शिवप्रसाद, आचार्य (टीकाकार), *विष्णुधर्मोत्तर पुराण*, वाराणसी : चौखम्भा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. कल्याण, तीर्थाङ्क, गोरखपुर : गीताप्रेस।

चतुर्थवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
400-499

श्रेयोऽङ्काः - 4
होराः - 60

सप्तमसत्रार्द्धः (SEMESTER – 7)

प्रधानः पाठ्यक्रमः (Major) 4.1: चित्रविधानम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. चित्रप्रकारज्ञानप्रदानम्।
2. चित्रप्रतिमामानज्ञानप्रदानम्।
3. चित्रभेदानां ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. अष्टविधचित्रकर्माणि वर्णयिष्यन्ति।
2. चित्रकर्मारम्भे अपिक्षितान् अंशान् व्याख्यास्यन्ति।
3. रूपनिर्माणं स्त्रीपुरुषलक्षणानि च प्रतिपादयिष्यन्ति।
4. चित्रकर्मणि एकादश रसाः, ललितादिदृष्टिविधानं च व्याख्यातुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 4.1	चित्रविधानम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. चित्रकर्मप्रवेशः। **श्रेयोऽङ्कः १**

- अष्टविधचित्रकर्माणि।
- सत्य-वैणिक-नागर-मिश्रचित्रभेदाः।
- चित्रप्रतिमातालनिर्णयः।
- विविधमानप्रमाणानि।
- पत्रजातिकण्टभेदाः जीवसूत्रनिर्णयः।

अन्वितिः २. चित्रकर्मारम्भः। **श्रेयोऽङ्कः १**

- भूमिबन्धः।
- पट्टपत्रवर्तनानिर्णयः।
- लेपकर्म।
- अण्डकालेखनवर्णविधानम्।

अन्वितिः ३. चित्राभिधानम्। **श्रेयोऽङ्कः १**

- देव-असुर-कुब्ज-मनुष्यादीनां विविधभेदाः।
- रूपनिर्माणं स्त्रीपुरुषलक्षणानि।
- शिव-विष्णु-ब्रह्मा-लक्ष्मी, सरस्वती-पार्वती-दुर्गा-काली-इन्द्रग्न्यादिप्रमुखदेवादीनां चित्रलक्षणम्।

अन्वितिः ४. चित्रकर्मणि रसादिविधानम्। **श्रेयोऽङ्कः १**

- चित्रकर्मणि एकादश रसाः, ललितादिदृष्टिविधानम्।
- रागचित्राणि।
- चित्रप्रयोगे प्रयोज्याप्रयोज्य विचार:।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts)

1. द्विवेदी, शिवप्रसाद, आचार्य (टीकाकार), *विष्णुधर्मोत्तर पुराण*, वाराणसी : चौखम्भा सुरभारती प्रकाशन।
2. जुगनू, श्रीकृष्ण (टीकाकार), *समरांगणसूत्रधार*, वाराणसी : चौखम्भा संस्कृत सीरीज।
3. जुगनू, श्रीकृष्ण, *अपराजितपृच्छा*, दिल्ली : परिमल संस्कृत ग्रंथमाला।

सहायकाः ग्रन्थाः (Additional Readings)

1. *भरतमुनिविरचितं नाट्यशास्त्रम् - षष्ठः अध्यायः, अभिनवभारतीसहितम्।*

काठिन्यस्तरः
400-499

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 4.2: धार्मिकसङ्गीतप्रबन्धनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. सङ्गीतपरम्पराज्ञानप्रदानम्।
2. धार्मिकसङ्गीतभेदज्ञानप्रदानम्।
3. वाद्ययन्त्राणां परिज्ञानम्।
4. सङ्कीर्तनमहिमाज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. सङ्गीतस्य भारतीयपरम्परां वर्णयितुं सिद्धाः भविष्यन्ति।
2. भक्तिमार्गे कीर्तनमाहात्म्यं बोधयितुं समर्थाः भविष्यन्ति।
3. भक्तिमार्गे सङ्गीतयोजनायाः विश्लेषणं कर्तुं शक्ष्यन्ति।
4. विविधवाद्ययन्त्राणां परिचयं वक्तुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 4.2	धार्मिकसङ्गीतप्रबन्धनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भारतीयसङ्गीतपरम्परा। **श्रेयोऽङ्कः १**

- वैदिकवाङ्मये सङ्गीतविमर्शः।
- नारदीयशिक्षा-नाट्यशास्त्रादिषु सङ्गीतविमर्शः।
- नटराजशिवः।

अन्वितिः २. भक्तिमार्गे कीर्तनमाहात्म्यम्। **श्रेयोऽङ्कः १**

- भक्तिसूत्रेषु नामसङ्कीर्तनम्।
- नवधाभक्तिः पौराणिकसाहित्ये कीर्तनसन्दर्भाः।

अन्वितिः ३. भक्तिमार्गे सङ्गीतयोजना। **श्रेयोऽङ्कः १**

- पुष्टिमार्गीयहवेलीसङ्गीतम्।
- विविधपूजोत्सवपदाः।
- भक्तकवेः भजनम्।
- निशाजागरणादिषु सङ्गीतपरम्परा।

अन्वितिः ४. मन्दिरेषु मङ्गलवाद्यसंयोजनम्। **श्रेयोऽङ्कः १**

- घण्टा-झल्लरी-मृदङ्ग-कांस्यताल-वीणा-मुरली-करताल-घटादि परम्परागतवाद्यानि।
- शहनाई-नौबत-ढोल-हारमोनियम-तबलादिमिश्रभारतीयवाद्यानि।
- ध्वनिविस्तारकयन्त्रस्य प्रयोगः।
- भजनस्य ध्वनिमुद्रणवादनम्।
- ध्वनिप्रदूषणनिरोधने नियन्त्रणप्रणाली।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts)

1. *सूरसागर*, खेमराज श्रीकृष्णदास।
2. शिवजी, रघुनाथजी, *श्री वल्लभपुष्टिप्रकाश*, खेमराज श्रीकृष्णदास।
3. जुगनू, श्रीकृष्ण, *अपराजितपृच्छा*, दिल्ली : परिमल संस्कृत ग्रंथमाला।

सहायकाः ग्रन्थाः (Additional Readings)

1. रङ्गरामानुजाचार्य, डा. पि.टि.जि. (संपादक), (2009), *श्रीपरमपुरुषसंहिता*, तिरुपति : नव्यश्री पब्लिकेशंस।
2. विजयसारथि, (श्रीभाष्यं), *सङ्गीतमाधवम्*, आन्ध्रप्रदेश : सर्ववैदिक संस्थान।
3. सक्सेना, डॉ. राकेश बाला, *मध्ययुगीन वैष्णव सम्प्रदायों में संगीत*, दिल्ली : श्रीकृष्ण साहित्य सदन।

काठिन्यस्तरः
400-499

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 4.3: लोकन्यासव्यवस्था

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. लोकन्यासस्य ज्ञानप्रदानम्।
2. मन्दिरप्रबन्धने लोकन्यासानां भूमिकायाः ज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयस्मृत्यादिग्रन्थेषु वर्णितन्यासप्रबन्धनस्य न्यासनियमानाञ्च वर्णने समर्थाः भविष्यन्ति।
2. न्यासस्थापनविधीः वर्णयिष्यन्ति।
3. न्याससम्पादने विविधव्यवस्थाः (आय-व्यय-दान-वेतन-सामग्रीसङ्ग्रहणादि) निरूपयिष्यन्ति।
4. व्रतपर्वादिकाले आवास-परिवहन-मार्गनिर्देशनादिव्यवस्थानां पालनं निर्देशनं च कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 4.3	लोकन्यासव्यवस्था	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्राचीनभारतीयन्यासव्यवस्था। **श्रेयोऽङ्कः १**

- स्मृतिग्रन्थेषु अर्थशास्त्रादिराजनयग्रन्थेषु न्यासव्यवस्थायाः मूलम्।
- न्याससम्पत्त्यादीनां प्रबन्धनम्।
- न्याससम्पत्त्यादीनां विक्रयसम्बन्धिभारतीयनियमाः।

अन्वितिः २. न्यासरचना (न्यासगठनम्) **श्रेयोऽङ्कः १**

- न्यासस्यावधारणा।
- स्थापनाप्रक्रिया।
- न्याससदानाम् अधिकाराः कर्त्तव्यञ्च।

अन्वितिः ३. सम्पत्तिव्यवस्थापनम्। **श्रेयोऽङ्कः १**

- न्याससम्पत्तिसम्बन्धिशासकीयनियमाः।
- आय-व्ययस्य वित्तीय-आकलन-लेखासम्परीक्षायाः व्यवस्था।
- अधिकोषस्य (बैंक खाता) सञ्चालनम्।
- दान-वेतनादिप्रबन्धनम्।
- दानसामग्रीसङ्ग्रहणस्य सुनियोजिता व्यवस्था।
- अर्चकादेः अंशः वेतनञ्च।

अन्वितिः ४. पर्वोत्सवप्रबन्धनं सामाजिकदायित्वञ्च। **श्रेयोऽङ्कः १**

- पर्वोत्सवेषु शासकीयविभागेन सह समन्वयः।
- सुरक्षाव्यवस्था।
- दर्शनादिव्यवस्था।
- धर्मशाला-चिकित्सालय-पाठशालादीनां प्रबन्धनम्।

निर्धारिताः ग्रन्थाः (Essential/RecommendedReadings/Texts)

1. गैरोला, वाचस्पति (टीका), *अर्थशास्त्र*, वाराणसी : चौखम्बा प्रकाशन।
2. जैन, एस के, *लोकन्यास विधि संग्रह*, भोपाल : सुविधा ला हाउस।

सहायकाः ग्रन्थाः (Additional Readings)

1. बाबेल, वसन्तीलाल, *राजस्थान लोकन्यास कानून*, जयपुर : यूनिक ट्रेडर्स।

काठिन्यस्तरः
400-499

श्रेयोऽङ्काः - 4
होराः - 60

अष्टमसत्रार्द्धः (Semester – 8)

प्रधानः पाठ्यक्रमः (Major) 4.4 : दर्शनार्थि-सौविध्य-प्रबन्धनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. आवासपरिवहनसौविध्यज्ञानप्रदानम्।
2. दर्शनसौविध्यज्ञानप्रदानम्।
3. प्रचारसामग्रीवितरणस्य विक्रयस्य च परिज्ञानम्।
4. स्वच्छताचिकित्सादिसौविध्यस्य परिज्ञानम्।

अधिगमनस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. आवासपरिवहनसौविध्यपरिकल्पने समर्थाः भविष्यन्ति।
2. क्षेत्राधारितविविधपरम्परामनुसृत्य दर्शनव्यवस्थासञ्चालने कुशलाः भविष्यन्ति।
3. तीर्थसम्बन्धिप्रचारादिव्यवस्थायां जालपुटमाध्यमेन कार्यं कर्तुं समर्थाः भविष्यन्ति।
